


# त्रयः प्रश्नाः

गान्धारं मालवं च सुविशालौ समृद्धौ देशौ। तयोः मध्ये कौमुदीनामकं लघु राज्यम् आसीत्। द्वित्रशताधिकवर्षेभ्यः पूर्वं तत् राज्यम् अपि सुविशालम् एव आसीत्। किन्तु तदा तदा प्रवृत्तेषु युद्धेषु देशस्य केचन सीमाभागाः अन्यदेशस्य अधीनाः जाताः। अतः कौमुदीराज्यं लघु जातम् आसीत्।

इदानीं कौमुदीराज्यं चन्द्रकान्तः नाम राजा परिपालयति स्म। तस्य पुत्राः न सन्ति। ज्योत्स्नानामिका एका एव पुत्री अस्ति। ताम् एव पुत्रं भावयन् राजा राजोचिताः सर्वाः विद्याः पाठितवान् आसीत्। ज्योत्स्ना यदा प्राप्तवयस्का जाता तदा तस्याः सौन्दर्यं सर्वत्र प्रसिद्धं जातम्। यथा सौन्दर्यं प्रसिद्धं तथैव तस्याः बुद्धिमत्ता अपि विख्याता आसीत्।

राजा चन्द्रकान्तः पुत्र्याः बुद्धिमत्तां सौन्दर्यं च दृष्ट्वा यथा सन्तुष्टः भवति तथैव तस्याः विवाहं स्मृत्वा खिन्नः अपि भवति। 'योग्यं वरं चित्वा तस्मै पुत्री दातव्या, जामाता एव राज्यस्य उत्तराधिकारी भवेत्' इति राज्ञः इच्छा। किन्तु राजकुमार्याः विवाहसमस्या न तथा सुलभा।

कदाचित् राजा पुत्रीं स्वसमीपम् आहूय उक्तवान्— "वत्से! वर्धमानां भवतीं दृष्ट्वा अहं सन्तोषम् अनुभवामि। योग्ये काले भवत्याः विवाहः निर्वर्तनीयः इति चिन्तयामि च। किन्तु भवत्याः विवाहः अपरिहार्यां राजकीयसमस्याम् उद्भावयेत् इति भीतिः मम। अस्माकं देशम् उभयतः द्वौ बलशालिनौ देशौ स्तः इति भवती जानाति एव खलु? मालवदेशस्य राजकुमारः सिंहवर्मा भवतीं परिणेतुम् इच्छति इति श्रूयते। युद्धे मां पराजित्य अपि भवतीं परिणेतुं सः सिद्धः इति गुप्तचरद्वारा ज्ञातं मया।



गान्धारदेशस्य राजकुमारस्य कृष्णवर्मणः इच्छा का इति सम्यक् न जानामि चेदपि सुन्दरीं भवतीं परिणेतुं सः इच्छेत् एव इति अहं भावयामि। सिंहवर्मा कृष्णवर्मा च अर्हौ एव। किन्तु कस्मैचित् एकस्मै भवती दत्ता चेत् अपरः क्रुद्धः सन् युद्धार्थम् आगच्छेत्। अस्माकं सैन्यबलम् अत्यल्पम्। अतः तदा देशस्य गतिः शोचनीया स्यात्'' इति।

एतावत् उक्त्वा मौनम् आश्रितः चन्द्रकान्तः चिन्ताक्रान्तः सन् पुत्र्याः मुखं निर्निमेषं पश्यति। तदा ज्योत्स्ना हसन्ती उक्तवती– ''तात! इतोऽपि अन्यत् अपि वक्तुम् इच्छा अस्ति इति भवतः मुखं सूचयति। किमर्थं मध्ये स्थगितवान्? वदतु तावत्'' इति।

''वत्से! अद्य सर्वं वदामि। वस्तुस्थितिं दीर्घकालं गोपयितुं न इच्छामि अहम्। भवत्या माता अनुरोधपूर्वकं वदति यत् मम अनुजाय एव आवयोः पुत्री दातव्या इति। 'सिंहासनम् अन्यस्य कस्यचित् अधीनं न भवेत्। मम अनुजः माणिक्यवर्मा ज्योत्स्नां परिणेष्यति चेत् सर्वं सुष्ठु भविष्यति' इति वदति सा। एवं त्रिकोणसमस्या एषा। देशस्य अहितं यथा न सम्भवेत्, कस्यापि खेदः अपि यथा न भवेत् तथा समस्या जागरूकतया परिहर्तव्या। तत् कथम् इति अहं तु न जानामि। विवाहः रक्तपातस्य कारणं यथा न स्यात् तथा कमपि परिहारोपायं सूचयितुम् शक्नोति वा भवती? बुद्धिमत्तया भवती सुप्रसिद्धा। सा बुद्धिमत्ता इदानीं कार्योपयोगिनी भवतु'' इति उक्तवान् राजा चन्द्रकान्तः।

तदा ज्योत्स्ना मन्दहासपूर्वकम् उक्तवती– ''तात! एतत्सर्वं मया अविदितं तु न। समस्या केन प्रकारेण परिहरणीया इति चिन्तितवती अपि अस्मि अहम्। अहं तिस्रः परीक्षाः सूचयामि। तासु परीक्षासु यः उत्तीर्णः भविष्यति तम् एव परिणेष्यामि। एतेन समस्या निश्चयेन परिहृता भविष्यति। एतां वार्तां सर्वेभ्यः देशेभ्यः प्रेषयतु। ये पराजिताः भवन्ति ते मौनं गच्छेयुः इति तु नियमः'' इति।

पुत्र्याः वचनं श्रुत्वा सन्तुष्टः राजा हसन्– ''योग्यः उपायः एषः। किन्तु ताः तिस्रः

परीक्षाः काः?'' इति पृष्टवान्।

तदा ज्योत्स्ना हसन्ती– ''त्वरा किमर्थम्? अचिरात् एव सर्वं ज्ञास्यति एव भवान्'' इति उक्तवती।

सर्वेभ्यः देशेभ्यः अपि वार्ता प्रेषिता। परीक्षार्थम् अपेक्षितः सन्नाहः अपि कृतः। बहवः राजकुमाराः आगताः। किन्तु ते पराजयं प्राप्य शिरः अवनमय्य मौनं प्रतिगतवन्तः।

पार्श्वदेशीयौ राजकुमारौ सिंहवर्म-कृष्णवर्माणौ माणिक्यवर्मा चापि कौमुदी-राज्यम् आगतवन्तः। तेषां चलनवलनं सूक्ष्मं परिशीलयितुं गुप्तचरान् नियोजितवती आसीत् ज्योत्स्ना। माणिक्यवर्मणः कृष्णवर्मणः परस्परपरिचयः अत्र जातः, तौ दिनद्वयाभ्यन्तरे आत्मीयौ अपि जातौ इति ज्ञातं ज्योत्स्नया। माणिक्यवर्मा परीक्षायां पराजितः, सिंहवर्मा अपि असफलः जातः इत्यपि ज्ञातं तया।

सा तत्क्षणे एव पितरं सूचितवती यत् यत्र कृष्णवर्मा निवसति तस्य भवनस्य विशेषरक्षणव्यवस्था भवतु इति।

अनन्तरदिने कृष्णवर्मा परीक्षामन्दिरम् आगतवान्। तत्र स्थिताः ज्योत्स्नायाः सख्यः तम् आदरेण स्वागतीकृतवत्यः। अनन्तरं ताः तम् एकं प्रकोष्ठं नीतवत्यः। तत्र भित्तौ विविधानि चित्राणि उत्तोलितानि आसन्। तेषां मध्ये अनुपमसुन्दर्याः ज्योत्स्नायाः अपि



चित्रम् आसीत्।

सख्यः कृष्णवर्मणे तानि चित्राणि प्रदर्शयन्त्यः उक्तवत्यः– ''एतेषु चित्रेषु परमरमणीयं, चित्रकारस्य प्रतिभायाः द्योतकं च चित्रं किम्? एषा प्रथमा परीक्षा। एतस्याम् उत्तीर्णः द्वितीयपरीक्षार्थम् अर्हतां प्राप्नोति'' इति।

कृष्णवर्मा तानि सर्वाणि चित्राणि जागरूकतया परिशीलितवान्। अन्ते एकं चित्रं प्रदर्श्य उक्तवान्– ''एतत् एव उत्तमं चित्रम्'' इति।

तस्मिन् चित्रे विविधैः वर्णमयैः पुष्पैः युक्तानां गुल्मानां मध्ये श्वेतवर्णीया काचित् धेनुः तर्णकं प्रीत्या लिहन्ती आसीत्। समीपे



एव स्थिते कासारे रमणीयानि कमलानि विकसितानि दृश्यन्ते स्म। नेत्रानन्दकरम् आसीत् तत् चित्रम्।

कृष्णवर्मणः वचनं श्रुत्वा काचित् सखी असमाधानं प्रकटयन्ती पृष्टवती– "केन आधारेण एतदेव चित्रम् उत्तमम् इति वदति भवान्? अनुपमसुन्दर्याः राजकुमार्याः चित्रम् अपि अस्ति अत्र। तस्य अपेक्षया अपि एतदेव कथम् उत्तमम्?" इति।

तदा कृष्णवर्मा हसन् उक्तवान्– "परीक्षार्थिना यत् उक्तं तत् निराकृत्य, आक्षेपवचनानि उक्त्वा परीक्षार्थिनि भ्रमः उत्पादनीयः इति सूचितवती अस्ति वा राजकुमारी? भवत्यः यत्किमपि वदन्तु, मया यत् प्रदर्शितं तदेव श्रेष्ठं चित्रम्" इति।

"तत् कथम् इति निरूपयतु तावत्। वयं श्रोतुं कुतूहलिन्यः" इति उक्तवत्यः सख्यः।

"यदा कलायाः विमर्शनं कुर्मः तदा अस्माभिः शाश्वतस्य, निर्मलस्य च प्राकृतिकसौन्दर्यस्य एव प्राधान्यं दातव्यम्। अशाश्वतं मानवसौन्दर्यं नव रसान् द्योतयति चेदपि द्वितीयं स्थानं प्राप्तुम् अर्हति। प्राकृतिकं सौन्दर्यम् अस्पष्टं भवति। रेखाभिः तस्य चित्रणार्थं महत् कौशलम् अपेक्षितम्। मानवानाम् अङ्गसौष्ठवं तु स्फुटम् एव। यथास्थितं चित्रितं चेत् कार्यं सिध्यति। तस्य चित्रणे कलाकारेण चिन्तनं, विशेषपरिश्रमः वा करणीयः न भवति। एतस्य प्राकृतिकसौन्दर्यस्य चित्रणे कलाकारः पूर्णतः सफलः अस्ति। अतः एतत् एव अत्युत्तमं चित्रम्" इति उक्तवान् कृष्णवर्मा।

एतत् उत्तरं श्रुत्वा ताः सख्यः विनयेन कृष्णवर्माणं नमस्कृत्य– "अस्माकं राजकुमार्याः मनसि यत् अस्ति तदेव आविष्कृतं भवता। अतः एवम् अग्रे आगच्छतु। द्वितीयं प्रश्नं पठतु तावत्" इति उक्त्वा एकं तालपत्रं तस्मै दत्तवत्यः।

तस्मिन् तालपत्रे लिखितम् आसीत्– "भाविन्यां पत्न्यां पुरुषेण कः अंशः न द्रष्टव्यः? भाविनि पतौ स्त्रिया च कः अंशः न द्रष्टव्यः?" इति।

कृष्णवर्मा प्रश्नं पठित्वा समनन्तरम् एव

उक्तवान्– "भाविन्यां पत्न्यां सौन्दर्यं प्रधानतया न गणनीयम्। परिणेतव्यस्य पुरुषस्य ऐश्वर्यम् अपि न गणनीयं स्त्रिया। यतः स्त्रियः सौन्दर्यं, पुरुषस्य ऐश्वर्यं च अशाश्वतम्" इति।

एतत् श्रुतवतीनां सखीनां मुखानि सन्तोषेण विकसितानि। ताः कृष्णवर्माणं नमस्कृत्य– "आर्य! ज्योत्स्नादेव्या आयोजिते परीक्षाद्वये अपि उत्तीर्णः भवान्। तृतीयां परीक्षां सम्मुखीकरोतु तावत्" इति उक्त्वा अन्तः गत्वा एकां श्रीगन्धपेटिकाम् आनीय दत्तवत्यः।

अनन्तरं ताः कृष्णवर्माणम् उक्तवत्यः– "परीक्षाद्वये अपि यः उत्तीर्णः भवति तस्मै एषा पेटिका दातव्या इति राजकुमार्याः आदेशः आसीत्। एतस्याः पेटिकायाः आन्तर्यं किम् इति एकदिनाभ्यन्तरे वक्तव्यं भवता। एतां पेटिकां वसतिं नीत्वा सुसूक्ष्मं परिशीलयितुम् अर्हति भवान्" इति।

कृष्णवर्मा पेटिकया सह वसतिम् आगतवान्। पेटिकां परीक्षादृष्ट्या सुसूक्ष्मं परिशीलितवान् च। चतुरस्राकारिकायाः तस्याः पेटिकायाः उपरितनभागे पार्श्वद्वये च विविधानि चित्राणि चित्रितानि आसन्।

पेटिकायाः अन्तः तु विविधजातीयानि शुष्कानि पर्णानि, कानिचन हरितानि पर्णानि, कण्टकानि, तृणानि च स्थापितानि आसन्। पेटिकायाः उपरि उदयमानः सूर्यः चित्रितः आसीत्। स च सूर्यः द्वाभ्यां सर्पाभ्याम् आवृतः आसीत्। लताभिः परिवेष्टिताः केचन वृक्षाः अपि तत्र चित्रिताः आसन्।

सुसूक्ष्मं परिशील्य तेषां सर्वेषाम् आन्तर्यं ज्ञातवान् कृष्णवर्मा। अनन्तरं सः भटद्वारा राजकुमारीं प्रति वार्तां प्रेषितवान् यत् पेटिकायाः तात्पर्यस्य भेदनार्थं दिनत्रयस्य अवधिः अपेक्षितः इति।

अन्धकारप्रसारस्य अनन्तरं कृष्णवर्मा वेषं परिवृत्य अश्वम् आरुह्य पूर्वस्यां दिशि प्रस्थितवान्।

(अग्रिमसञ्चिकायां समाप्ता भविष्यति।)





# तिस्रः परीक्षाः

(गतसञ्चिकातः अनुवृत्ता)

आरात्रि निरन्तरं प्रयाणं कुर्वन् कृष्णवर्मा अनन्तरदिने मध्याह्नसमये कौमुदीदेशस्य पूर्वस्यां दिशि स्थितम् अरण्यं प्राप्तवान्। इतस्ततः पश्यन् सः अग्रे गतवान्। एकत्र तेन उन्नतः चन्दनवृक्षः दृष्टः। चन्दनवृक्षस्य अधः परस्परालिङ्गननिरताभ्यां सर्पाभ्यां युक्ता शिलामूर्तिः दृष्टा कृष्णवर्मणा।

कृष्णवर्मा आश्चर्यम् अनुभवन् मूर्तेः सौन्दर्यं क्षणकालं दृष्टवान्। अनन्तरं परीक्षादृष्ट्या परितः अपि दृष्टवान्। तदनन्तरम् अश्वात् अवतीर्य खड्गं कोषात् आकृष्य हस्तेन गृहीत्वा शिलामूर्तेः समीपं गतवान् सः।

तावता पृष्ठभागतः जागरूकतासूचकः ध्वनिः श्रुतः– "तिष्ठतु तावत्" इति।

कृष्णवर्मा गमनं स्थगयित्वा परिवृत्य दृष्टवान्। कश्चन तरुणः कृष्णवर्मणः समीपम् आगत्य नमस्कृत्य स्थितवान्। कृष्णवर्मा आश्चर्येण पश्यन् तं पृष्टवान्– "कः भवान्? कुतः आगतवान्? किं कुर्वन् अस्ति अत्र?" इति।

"भवतः अत्र आगमनस्य कारणीभूता व्यक्तिः अहम् एव। भवन्तम् अनुसृत्य आगतं मया" इति उक्तं कोमलस्वरेण।

एतत् श्रुत्वा स्वरस्य मृदुतां च दृष्ट्वा कृष्णवर्मा आश्चर्येण उक्तवान्– "राजकुमारी खलु भवती?" इति।

ज्योत्स्ना अङ्गीकारपूर्वकं शिरः चालयन्ती उक्तवती– "कृष्णवर्मवर्य! आम्। अहम् अस्मि कुमारी ज्योत्स्ना। पेटिकायाः उपरि चित्रितस्य चित्रस्य आधारेण भवता अत्र आगतम्। अतः तृतीयायां परीक्षायाम् अपि जयः प्राप्तः



भवता। आगच्छतु, राजधानीं प्रतिगच्छाव तावत्'' इति।

कृष्णवर्मा गाम्भीर्येण तां पश्यन्– ''ज्योत्स्नादेवि! पेटिकायाः उपरि यत् चित्रं चित्रितं तस्य, एतस्य प्रदेशस्य च विशेषसम्बन्धः कोऽपि अस्ति इति अहं भावयामि। तं सम्बन्धं पूर्णतः अज्ञात्वा कथं प्रतिगन्तुं शक्येत? तथा प्रतिगमनम् उचितं स्यात् वा?'' इति पृष्टवान्।

एतस्य किम् उत्तरं वक्तव्यम् इति चिन्तयन्ती स्थितवती ज्योत्स्ना। तावता कृष्णवर्मा पुनरपि मृदुना स्वरेण उक्तवान्– ''भवत्याः सन्देहः अवगतः मया। अग्रे गतं चेत् अपायः स्यात् इति खलु भवत्याः आशयः? किन्तु अपायस्य भीत्या प्रतिगमनं क्षत्रियस्य न शोभते। भाविनं राजानं मां प्रतिप्रेषयितुं भवत्या अपि प्रयत्नः न करणीयः। वीरपत्नीत्वं भवत्याः अपि इष्टम् एव खलु?'' इति।

कृष्णवर्मा कथमपि प्रतिगन्तुं न सिद्धः इति निश्चित्य ज्योत्स्ना– ''अस्तु तावत्। एतत्सम्बन्धे अहं यावत् जानामि तावत् प्रथमं वदामि। आगच्छतु, उपविशतु तावत्'' इति उक्त्वा समीपस्थस्य वृक्षस्य अधः उपविष्टवती।

अनन्तरं सा कटौ वस्त्रस्य अन्तः रक्षितं तालपत्रं प्रदर्शयन्ती उक्तवती– ''भवान् कथमपि न प्रतिगच्छेत् इति निश्चित्य एव अहम् अत्र आगमनसमये एतत् तालपत्रम् अपि आनीतवती। एतच्च पत्रं बहुभ्यः वर्षेभ्यः अस्मत्पूर्वजैः जागरूकतया रक्षितम्। एतस्य पृष्ठभूमौ काचित् कथा एव अस्ति। श्रावयामि, शृणोतु तावत्।

सहस्राधिकवर्षेभ्यः पूर्वम् अस्माकं वंशे हैहयवर्मा नाम शूरः, धीरः, राजा आसीत्। सः मन्त्रतन्त्रशास्त्रे अपि निपुणः आसीत्। सः बहून् राज्ञः माण्डलिकान् कृत्वा तद्द्वारा अपारां सम्पत्तिं सङ्गृहीतवान्। किन्तु दौर्भाग्यं नाम तदीयः अद्वितीयः पुत्रः अजयवर्मा अविवेकी मन्दमतिः च आसीत्। अतः हैहयवर्मणः मनसि भीतिः आसीत् यत् मम अनन्तरं राज्यलक्ष्मीः हस्तच्युता भवेत्

इति। अतः सः अपारां तां सम्पत्तिं, मन्त्रशक्तियुक्तं खड्गं च कुत्रापि रहस्यरूपेण स्थापितवान्। गुरोः साहाय्येन मन्त्रबलात् रक्षणम् अपि कल्पितवान्।

किन्तु रक्षणार्थं तेन किं तन्त्रम् आश्रितं, निधेः प्रतिप्राप्त्यर्थं कः उपायः इत्यादिकं केनापि न ज्ञायते। हैहयवर्मा तालपत्रे लिखितवान् अस्ति यत्– स च निधिः कौमुदीराज्यस्य पूर्वस्यां दिशि स्थिते अरण्ये अस्ति। सर्पयुगलयुता शिलामूर्तिः निधिं सङ्केतयति। रक्षणव्यवस्थायाः, भेदनार्थं, निधेः मन्त्रशक्तियुक्तस्य खड्गस्य च प्राप्तर्थं वा मन्त्रशक्तिः आश्रयणीया नास्ति। बुद्धिशक्त्या एव तत् साधयितुं शक्यते। धर्मपरः, वीरः, मेधावी कश्चित् एतत् कार्यं साधयितुम् अर्हति इति। तच्च तालपत्रम् अस्मद्वंशीयैः जागरूकतया एतावत्पर्यन्तं रक्षितम् अस्ति। एतस्य तालपत्रस्य विषयं केवलम् अस्मद्वंशीयाः जानन्ति। अन्यः कोऽपि न जानाति। तालपत्रस्य आधारेण अस्मद्वंशीयैः निधिः तु न प्राप्तः,तथापि तैः रहस्यं तु सर्वथा गोपितम्। अतः एतत् रहस्यं कदापि प्रकटितं न अभवत्। तालपत्रे सूचितस्य सङ्केतस्य आधारेण प्रयत्ने कृते अपि अस्मद्वंशीयाः निधिं प्राप्तुं न शक्तवन्तः। एवं स्थिते अन्येषां का कथा? एवं च सहस्राधिकवर्षेभ्यः स च निधिः स्वीकर्तारं भाग्यशालिनं प्रतीक्षमाणः



तिष्ठति'' इति।

अनन्तरं ज्योत्स्ना कृष्णवर्मणे तालपत्रं दत्तवती।

कृष्णवर्मा तत् अस्वीकुर्वन् ज्योत्स्नाम् उक्तवान्– ''भवत्या पूर्वेतिहासः उक्तः। अनन्तरकाले किं जातम् इति तु न उक्तम्'' इति।

ज्योत्स्ना तम् अभिमानेन पश्यन्ती उक्तवती– ''अस्माकं पूर्वजेन हैहयवर्मणा यथा चिन्तितं तथैव प्रवृत्तम्। सामन्तराजाः तदीयं पुत्रम् अजयशर्माणं विरुध्य युद्धं कृत्वा स्वतन्त्राः जाताः। तेषु केचन कौमुदीराज्यस्य अनेकान् भागान् स्वायत्तीकृतवन्तः अपि। किन्तु हैहयवर्मणा रहस्यरूपेण स्थापितः



भवतः शक्तिसामर्थ्यं चिन्तनरीतिं च श्रुत्वा दृष्ट्वा च मया निश्चितं यत् एतत् कार्यं भवता साध्यते इति। निधिः न प्राप्तः चेदपि मन्त्रशक्तियुक्तः खड्गः प्राप्तः चेत् अलम्। तावता इष्टं सिद्धम् इति अहं भावयामि। भवान् एकाकी अश्वम् आरुह्य प्रस्थितः इति गूढचरद्वारा श्रुतवती अहम्। एतेन मया चिन्तितं यत् सङ्केतः भवता अवगतः इति। भवत् कदाचित् आपद्ग्रस्तः भवेत् इति भीत्या अहं पुरुषवेषेण भवन्तम् अनुसृतवती। मन्त्रशक्तिनिबद्धायां समस्यायां भवतः प्रेरणम् उचितं स्यात् वा, व्यर्थे प्रयत्ने भवन्तं प्रेरितवती भवेयं वा इति सन्देहः बाधते माम्। अतः एव अग्रे प्रवर्तनं मास्तु इति सूचितं मया'' इति।

ज्योत्स्नायाः वचनं श्रुत्वा हसन् उक्तवान् कृष्णवर्मा– ''राजकुमारि! निधिप्राप्त्यर्थं मन्त्रशास्त्रप्रावीण्यं न आवश्यकम् इति हैहयवर्मणा सूचितं विस्मृतवती वा भवती? यद्यपि निधिः मन्त्रशक्त्या बद्धः अस्ति तथापि तस्य प्राप्तौ अपायः कोऽपि न भवेत् इति भाति मम। बुद्धिमत्तया जयः प्राप्तुं शक्यते इति मम विश्वासः। हैहयवर्मणा बुद्धिपरीक्षार्थं तन्त्राणि रचितानि स्युः। महान् अपायः कोऽपि अत्र निवेशितः न स्यात् एव। अन्यच्च जयः वा भवतु पराजयः वा, प्रयत्ने कः दोषः? अतः प्रयत्नं करवाव, आगच्छतु तावत्'' इति। अनन्तरं सः सर्पविग्रहं परितः

निधिः तेषु केनापि न प्राप्तः। अस्मत्पूर्वजैः द्वित्रैः निधिप्राप्त्यर्थं प्रयत्नः अपि कृतः। किन्तु तेऽपि असफलाः। 'एतां शिलामूर्तिम् अपसार्य अधः सुरङ्गमार्गः भूगृहं वा स्यात् वा इति अन्वेष्टव्यम्' इति ते बहुधा प्रयत्नं कृतवन्तः इति श्रूयते। किन्तु ते एतां मूर्तिं कम्पयितुम् अपि न शक्तवन्तः।

मम पितुः पुंसन्तानः नास्ति इत्यतः तालपत्रे लिखितम् एतत्सर्वं मया ज्ञातम्। मया इतः पूर्वम् अत्र आगत्य अन्विष्टम्। तत्समये एषा मूर्तिः दृष्टा। किन्तु निध्यन्वेषणमार्गः मया अपि न ज्ञातः। अतः विवाहनियमेषु एतं विषयम् अपि योजितवती। कुतूहलम् एव अत्र कारणम्।

सूक्ष्मतया समग्रं परिशीलितवान्।

क्षणकालस्य अनन्तरं कृष्णवर्मा अकस्मात्– "राजकुमारि! अत्र पश्यतु" इति उक्त्वा सर्पयोः फणयोः मध्ये स्थितम् अवकाशं प्रदर्शितवान्।

तत्र अङ्गुलद्वयपरिमिते स्थले किञ्चित् उच्चता दृश्यते स्म।

"आम्। एषः कश्चन विशेषः इति तु सत्यम् एव" इति उक्तवती ज्योत्स्ना।

"एतत् कीलकस्य स्थानम् एव कुतो न स्यात्? पश्याम तावत्" इति वदन् कृष्णवर्मा ज्योत्स्नां किञ्चिद्दूरं प्रेषयित्वा तत् उच्चतायुक्तं स्थलं लक्ष्यीकृत्य बाणं प्रयुक्तवान्। तेन प्रयुक्तः बाणः लक्ष्ये सम्यक् लग्नः।

अपरस्मिन् क्षणे महता शब्देन सह विद्युतः स्फुरणं जातम्। यावत् शब्दः स्थगितः तावता सर्पमूर्तिः तत्र न आसीत्। तस्मिन् स्थले भूमेः अन्तः गन्तुं सोपानानि दृश्यन्ते स्म।

प्रयत्नस्य साफल्येन नितरां सन्तुष्टः अभवत् कृष्णवर्मा। सः ज्योत्स्नया सह सोपानमार्गेण अग्रे गतवान्।

सोपानमार्गस्य अनन्तरं लघुः पादमार्गः दृष्टः। पादामार्गेण यदा अग्रे गतं तदा विशालम् अङ्गणं प्राप्तम्। तत्र समीचीनः प्रकाशः दृश्यते स्म।

अङ्गणस्य मध्ये किञ्चन सरोवरम् आसीत्। सरोवरे सुवर्णवर्णेन प्रकाशमानानि



बहूनि कमलानि आसन्। तेषां मध्ये एकम् एव कमलं श्वेतवर्णेन आसीत्। सरोवरस्य-दक्षिणपार्श्वे कश्चन महावृक्षः दृश्यते स्म। वृक्षं परितः शिलामयी वेदिका। वेदिकायाः उपरि आवरणसहितं सुवर्णपात्रद्वयम् आसीत्। वृक्षस्य पृष्ठतः चुल्ली अन्यत् पात्रद्वयं च दृश्यते स्म।

तानि पश्यन्ती उक्तवती ज्योत्स्ना– "पुनः अत्रापि काऽपि गूढता अस्ति इति भासते" इति।

"आम्। अपूर्वाणि वस्तूनि कदापि अप्रयत्नेन न लभ्यन्ते" इति उक्त्वा क्षणकालं चिन्तयित्वा पुनः उक्तवान् कृष्णवर्मा– "प्रायः तानि कमलानि रत्नराशयः स्युः श्वेतं कमलं मन्त्रशक्तियुक्तः खड्गः स्यात्



रत्नराशिः खड्गः च कथं प्राप्तव्यः इति सुवर्णपात्रेषु सङ्केतः स्यात्'' इति। अनन्तरं सः वृक्षस्य समीपं गत्वा सुवर्णपात्रयोः आवरणम् अपसार्य दृष्टवान्।

एकस्मिन् पात्रे सुगन्धयुक्तानि भक्ष्याणि आसन्। अपरस्मिन् केचन तण्डुलकणाः आसन्।

कृष्णवर्मा एतानि दृष्ट्वा क्षणकालम् आलोचितवान्। वृक्षस्य पृष्ठभागे स्थितां चुल्लीं, काष्ठं, पात्रद्वयं चापि परिशीलितवान् सः।

अनन्तरं सः ज्योत्स्नां– ''निधिप्राप्त्यर्थम् आगच्छतां परीक्षार्थम् एतत्सर्वम् अस्ति इति भाति। अपरिचिते स्थले सिद्धं भक्ष्यं किमपि न खादनीयम्'' इति वदन् तण्डुलपात्रम् उन्नीय सरोवरं प्रति गन्तुम् उद्युक्तः।

''पात्रस्थं तण्डुलम् अहं प्रक्षाल्य आनयामि। पात्रम् अत्र ददातु तावत्'' इति उक्त्वा कृष्णवर्मणः हस्ततः पात्रं स्वीकर्तुम् उद्युक्ता ज्योत्स्ना।

कृष्णवर्मा तां निवारयन्– ''भवत्याः गमनं मास्तु। भवती अत्रैव तिष्ठतु। सरोवरे कोऽपि मायाप्रभावः स्यात्। अतः अहम् एव गत्वा प्रक्षाल्य आगच्छामि'' इति उक्त्वा रिक्तम् एकं पात्रम् अपि स्वीकृत्य सरोवरसमीपं गतवान्। अन्येन पात्रेण सरोवरजलम् आनीय तण्डुलपात्रे पातितवान्, तण्डुलं प्रक्षालयितुम् उद्युक्तः च।

सरोवरजलस्य स्पर्शेन तण्डुलपात्रे उष्णता उत्पन्ना, वेगेन अवर्धत च। ताम् उष्णतां सोढुम् अशक्तः कृष्णवर्मा पात्रं तत्रैव स्थापयित्वा पृष्ठतः अपसृतवान्। पात्रं सरोवरे पतितम् अभवत्।

पात्रस्य पतनेन सरोवरस्थं जलम् अदृश्यम् अभवत्। तत्र सर्वत्र नवरत्नराशयः एव दृष्टाः। कृष्णवर्मा ज्योत्स्ना च निधिराशिम् आश्चर्येण पश्यतः।

एतावता ताभ्यां स्मृतं यत् निधिराशौ मन्त्रशक्तियुक्तः खड्गः न दृश्यते इति। अतः तौ निधिदर्शनसन्तोषं विस्मृत्य खड्गस्य अन्वेषणार्थम् उद्युक्तौ जातौ।

अल्पेन एव परिश्रमेण निधीनां मध्ये स्थितं

श्वेतं पद्मं ताभ्यां दृष्टम्।

"भवता कृतेन प्रयत्नेन स्वर्णकमलानि नवरत्नराशिरूपेण परिवृत्तानि। किन्तु श्वेतं पद्मं तथैव अस्ति। एतत् श्वेतं पद्मं खड्गरूपं यथा प्राप्नुयात् तथा कर्तुं कः उपायः आश्रयणीयः इति न ज्ञायते" इति उक्तवती ज्योत्स्ना।

कृष्णवर्मा प्रत्युत्तरं किमपि अवदन् तत् श्वेतपद्मं बलात् आकृष्टवान्। तदा श्वेतपद्मस्य स्थाने कश्चन राक्षसः दृष्टिगोचरः जातः।

ज्योत्स्ना कृष्णवर्मा च राक्षसम् आश्चर्येण पश्यतः।




तदा सः राक्षसः कृष्णवर्माणं पृष्टवान्– "अये, राजकुमार! प्रयत्नेन प्राप्तं निधिं स्वीकृत्य निर्गन्तव्यं खलु भवता? तथापि मां किमर्थम् आहूतवान्?" इति।

राक्षसस्य प्रश्नं श्रुत्वा कृष्णवर्मा गाम्भीर्येण उक्तवान्– "मां धनाशाग्रस्तं सामान्यं भावयति वा भवान्? निधिः मम दृष्ट्या गौणः। अपूर्वः खड्गः प्राप्तव्यः इति उद्देशेन एव अहम् अत्र महता प्रयत्नेन आगतः" इति।

तदा राक्षसः विकटाट्टहासं कुर्वन् उक्तवान्– "अहो, महापौरुषवान् भवान्। किन्तु एतावता खड्गः न प्राप्यते। यः राजधर्मं सम्यक् जानाति तेन खड्गः प्राप्यते। अन्यच्च केवलं युद्धार्थम् उपयुज्यमानस्य खड्गस्य निमित्तम् एतावान् क्लेशः किमर्थम्? धनेन साधयितुम् अशक्यं किमपि नास्ति खलु? तादृशस्य धनस्य राशिः एव प्राप्तः अस्ति। पुनः खड्गार्थं किमर्थं वृथा श्रमः? निधिं स्वीकृत्य सुखेन जीवतु तावत्" इति।

एतत् श्रुत्वा कृष्णवर्मा मन्दहासपूर्वकम् उक्तवान्– "अहं यत् उत्तरं यच्छन् अस्मि तत् राजधर्मोपेतम् एव अस्ति। देशाभिवृद्ध्यर्थं केवलेन धनेन न किमपि प्रयोजनम्। कृषितः आहारवस्तूनि प्राप्यते। सुखेन जीवननिर्वहणार्थं यद्यत् आवश्यकं तत्सर्वं भगवता लोके सृष्टम् अस्ति। कृष्यादिकम् उपेक्षितं चेत् केवलं धनं किम्

आहारं ददाति? कृष्यादयः पोषिताः चेत् पुनः किं धनेन? वस्तुतः तु धनं मानवेषु लोभम् उत्पादयति। धनकारणतः एव जनाः राक्षसाः इव व्यवहरन्ति।धनेन सुखं लभ्यते इति तु भ्रान्तिः एव। अतः उत्तमे जीवने धनस्य पात्रं गौणम्। राजा धनाशायुक्तः भवति चेत् प्रजाः अपि धनाशाग्रस्ताः भवन्ति। अतः राजा धनाशारहितः भवेत्। प्रजाः सन्मार्गेण प्रवृत्ताः यथा स्युः तथा करणं राज्ञः आद्यं कर्तव्यम्। बलवन्तः बलहीनान् यथा न पीडयेयुः, दुष्टाः लोककण्टकानि यथा न स्युः तथा करणम् एव राजधर्मः। राजधर्मस्य पालनार्थं राजा दण्डसमर्थः स्यात्। अतः राज्ञः अत्यावश्यकं खड्गः एव'' इति।

कृष्णवर्मणः वचनं श्रुत्वा राक्षसः विनयेन तं नमस्कृत्य– ''भवादृशं महात्मानं बहोः कालतः अहं प्रतीक्षमाणः आसम्'' इति उक्त्वा आकाशे हस्तं प्रसार्य खड्गं प्राप्य, तं खड्गं कृष्णवर्मणे यच्छन्– ''एषः खड्गः यस्य हस्ते भवति तेन कदापि पराजयः न प्राप्यते। एतं खड्गं निधिं च स्वीकृत्य प्रजारञ्जकः सन् राज्यं पालयतु'' इति उक्त्वा पुनरपि नमस्कृत्य ततः अदृश्यः अभवत्।

कृष्णवर्मा खड्गं स्वीकृत्य नेत्राभ्यां स्पृष्ट्वा पुनः तं ज्योत्स्नायै यच्छन्– ''राजकुमारि! तृतीया परीक्षा अपि समाप्ता। पूर्वजानाम् एतं खड्गं स्वीकरोतु'' इति उक्तवान्।

ज्योत्स्ना खड्गस्वीकारं निराकुर्वती मन्दहासपूर्वकं– ''परीक्षाद्वारा यत् वस्तु प्राप्यते तत् जयं प्राप्तवता एव स्वीकरणीयम्। अन्यस्य तत्र नास्ति अधिकारः'' इति उक्तवती।

अनन्तरं तौ येन मार्गेण आगतं तेन एव मार्गेण राजभवनं प्रतिगतवन्तौ। चन्द्रकान्तराजः प्रवृत्तं सर्वं श्रुत्वा अतीव सन्तुष्टः अभवत्। अनन्तरं शुभे मुहूर्ते ज्योत्स्ना-कृष्णवर्मणोः विवाहः महता वैभवेन सम्पन्नः।

–(समाप्ता)





# पञ्च प्रश्नाः

कौशाम्बीनगरं पूर्वं सम्पद्भरितम् आसीत्। तत्समये सूर्यसेनः नाम राजा देशस्य परिपालनं कुर्वन् आसीत्। तस्य राज्ञः सुदीर्घकालानन्तरम् अपि सन्तानं न जातम्। अनन्तरं पुण्यफलात् इव महाराज्ञी गर्भवती जाता। यथाकाले प्रसूतवती च। तच्च सन्तानं पुत्री। स च शिशुः सुवर्णवर्णकान्त्या प्रकाशते। सुलोचना इति तस्य शिशोः नाम निश्चितम्। सुलोचना महत्या प्रीत्या पालिता।

पुत्र्याः प्राप्तिः सन्तोषकरी एव। तथापि महाराजस्य मनसि काचित् व्यथा सदा जागर्ति। 'मम तु पुत्रसन्तानं किमपि नास्ति। मम अनन्तरम् एतस्याः पुत्र्याः योगक्षेमं को वा निर्वहेत्? स्त्री नाम अबला। एतस्याः रक्षणव्यवस्था कथं वा भवेत्?' इति एतया चिन्तया सः प्राणान् अत्यजत्।

पितुः मरणसमये सुलोचना विवाहयोग्ये वयसि आसीत्। अपूर्वसुन्दर्याः तस्याः परिणयार्थम् अनेके राजकुमाराः अहमहमिकां प्रदर्शयन्तः आसन्। किन्तु तेषु कमपि परिणेतुं सा न इष्टवती। यतः ताम् परिणेतुम् इच्छन्तः राजकुमाराः सर्वे तस्याः रूपलावण्यम्, अपारां सम्पत्तिं च दृष्ट्वा आगताः। 'तादृशस्य कस्यचित् परिणयेन राज्यस्य प्रजानां च हितं धूलिसाद्भवति' इति तस्याः विचारः आसीत्। राज्यपालनार्थम् अपेक्षिताः विवेकः धैर्य-साहसादयः, दयार्द्रहृदयत्वं, परोपकारगुणः, अकुण्ठिता कार्यदीक्षा च यस्य भवन्ति तादृशः एव राजकुमारः परिणेतव्यः इति तस्याः दृढः निश्चयः। 'एतेन एव पितुः आत्मा तृप्तिं



प्राप्नोति' इति सा चिन्तयति।

एतेषु एव दिनेषु कुलगुरुः सुधाकराचार्यः तीर्थयात्रां समाप्य राजधानीं प्रत्यागतवान्। राजकुमारी सुलोचना गुरुं भक्त्या स्वागतीकृत्य प्रवृत्तं सर्वं निवेद्य स्वविवाहविषये आत्मना कृतं निर्णयं श्रावितवती। तथैव प्रार्थितवती यत् एतद्विचारानुगुणं वरान्वेषणे मार्गदर्शनं साहाय्यं च करणीयम् इति।

सुधाकराचार्यः तस्याः निर्णये सहमतिं प्रदर्शयन्– "भवती पितुः अनुगुणा पुत्री। अतः वंशयोग्यतानुगुणं निर्णयं कृतवती। भवत्या यथा चिन्तितं तादृशस्य धीरोदात्तस्य पुरुषस्य चयने कश्चन मार्गः अस्ति। अहं वर्षद्वयं यावत् अनेकेषु देशेषु सञ्चरन् अनेकानि विचित्राणि दृश्यानि दृष्टवान्। तदाधारेण पञ्च प्रश्नान् सज्जीकरिष्यामि। तेषां पञ्चानाम् अपि प्रश्नानाम् उत्तराणि यः ज्ञात्वा आगमिष्यति तं राजकुमारं परिणेतुम् अर्हति भवती। एतां वार्तां सडिण्डिमघोषं प्रसारयतु" इति उक्त्वा पञ्च प्रश्नान् तां श्रावितवान्।

गुरोः आदेशानुसारं सुलोचना स्वविवाहनियमं सर्वत्र सडिण्डिमघोषं प्रसारितवती। एतत् श्रुत्वा विभिन्नेभ्यः देशेभ्यः बहवः राजकुमाराः तां परिणेतुम् अग्रे आगतवन्तः। तेषु बहवः इतःपूर्वम् आगत्य प्रतिगताः एव।

एवम् उपस्थितेषु राजकुमारेषु एकोऽपि सुलोचनया पृष्टेषु प्रश्नेषु एकस्य अपि प्रश्नस्य युक्तम् उत्तरं वक्तुं न शक्तवान्। ते सर्वे निराशया प्रतिगतवन्तः।

एकदा नेपालदेशस्य राजकुमारः धीरसिंहः सुलोचनां दृष्ट्वा– "भवत्याः प्रथमः प्रश्नः कः?" इति पृष्टवान्।

"केभ्यश्चित् वर्षेभ्यः एतस्मिन् देशे एवं श्रूयमाणम् अस्ति यत् सकृत् दृष्टम्, पुनः अपि द्रष्टव्यम् इति आशा अस्ति इति। एतत् वचनं कुतः आगच्छति। एतस्य अन्तरार्थश्च कः? अयम् एव मम प्रथमः प्रश्नः" इति उक्तवती सुलोचना।

"अस्तु तावत्। सप्ताहावधिकः अवधिः दत्तः चेत् एतस्य उत्तरं ज्ञात्वा आगत्य



वदिष्यामि" इति उक्तवान् धीरसिंहः।

"अस्तु" इति अङ्गीकारं सूचितवती सुलोचना।

धैर्यस्य साहसस्य च मूर्तिमत्स्वरूपं धीरसिंहः उत्साहेन अश्वम् आरुह्य पूर्वदिशम् अनुसृत्य वेगेन प्रस्थितवान्। एवं गमनसमये तेन कश्चन अरण्यप्रदेशः प्राप्तः। तत्र सः द्वयोः शृगालयोः रवं श्रुतवान्। धीरसिंहः पशुपक्षिणां भाषां जानाति स्म।

सः झटिति अश्वात् अवतीर्य वृक्षस्य मूले आक्रन्दनं कुर्वतोः शृगालयोः समीपं गत्वा पृष्टवान्– "किं प्रवृत्तम्?" इति।

"अत्र अनतिदूरे कस्याञ्चित् गुहायां कश्चन भयङ्करः खड्गमृगः निवसति। सः अस्माकं पुत्रान् पादेन मर्दयन् मारयति। अतः अस्माकं कुलवृद्धिः न भवति। वयम् अस्माकं पुत्रान् यत्र कुत्रापि स्थापयेम चेदपि सः मारयति एव। अतः एव रोदनम् अस्माकम्" इति उक्तवन्तौ तौ शृगालदम्पती।

"कुत्र सः? प्रदर्श्यतां सः दुष्टः खड्गमृगः" इति उक्तवान् धीरसिंहः। शृगालः अग्रे गच्छन् मार्गप्रदर्शनं कृतवान्।

खड्गमृगस्य गुहायाः द्वारसमीपं गतवन्तौ शृगालः धीरसिंहः च। धीरसिंहः अन्तः दृष्टिं प्रसारितवान्। खड्गमृगः गाढनिद्रायां मग्नः आसीत्। सुप्तस्य मृगस्य मारणं धीरस्य लक्षणं न इति आलोच्य धीरसिंहः गुहायाः पुरतः स्थितं वृक्षम् आरुह्य उपविष्टवान्।

किञ्चित्कालानन्तरं खड्गमृगः निद्रातः उत्थाय गुहातः बहिः आगतवान्। धीरसिंहः हठात् खड्गमृगस्य उपरि आक्रमणं कृत्वा परशुना एकेन एव प्रहारेण तस्य शिरसः छेदनम् अकरोत्। खड्गमृगः प्राणरहितः जातः।

धीरसिंहस्य धैर्यं, साहसं, बलं च दृष्ट्वा शृगालदम्पती उक्तवन्तौ– "राजकुमार! पशुजातीयानाम् अस्माकं निमित्तं भवान् यत् उपकारं कृतवान् तत् आजीवनं स्मरावः। एतम् अरण्यप्रदेशं भवान् किमर्थम् आगतः? किं देवः एव आवयोः साहाय्यार्थं प्रेषितवान्, उत किमपि अन्यत् कारणम् अस्ति?" इति।

धीरसिंहः आत्मनः आगमनस्य कारणं निवेदितवान्। "आवाम् अपि तादृशं वचनं



श्रुतवन्तौ।किन्तु तत् कुतः आगच्छति इति न जानीवः। भवान् तु धैर्यवान् साहसी च। जीवने असाध्यं किमपि नास्ति इति आलोच्य सर्वत्र अन्वेष्टुम् इच्छन् पूर्वस्यां दिशि आगतवान् स्यात् इति भावयावः। एतत् अरण्यम् अतिक्रम्य वामतः परिक्रम्य गच्छतु। तत्र भवान् विजयं प्राप्स्यति'' इति उक्त्वा तौ शृगालदम्पती धीरसिंहं प्रेषितवन्तौ।

धीरसिंहः अरण्यम् अतिक्रम्य पादाभ्यां गच्छन् लता-गुल्म-प्रभृतिभिः युक्तं समतलप्रदेशं प्राप्तवान्। आयासपरिहारार्थं कस्यचित् वृक्षस्य अधः उपविष्टवान्।

तदा सः सर्पद्वयं दृष्टवान्। महासर्पः लघुसर्पं मारयितुं प्रयत्नं कुर्वन् आसीत्। लघुसर्पः आत्मरक्षणार्थं महान्तं प्रयत्नं कुर्वन् आसीत्। धीरसिंहः लघुसर्पं रक्षितुम् इच्छन् महासर्पस्य उपरि खड्गप्रहारार्थम् उद्युक्तः। तावता तौ सर्पौ गन्धर्वरूपेण स्थितवन्तौ।

''किम् एतत्? कौ भवन्तौ? किमर्थम् एवं परस्परहिंसायां मग्नौ?'' इति पृष्टवान् धीरसिंहः।

''अहं बाल्ये अज्ञानवशात् एतस्य अपकारं कृतवान्। तदा आरभ्य एषः वैरं साधयन् सदा माम् एवं पीडयन् अस्ति'' इति उक्तवान् कनिष्ठः गन्धर्वः।

''अज्ञानात् कृतः अपराधः क्षन्तव्यः। एतत् एव ज्येष्ठानां लक्षणम्। इतःपरं भवद्भ्यां परस्परद्वेषं विस्मृत्य प्रेम्णा व्यवहारः करणीयः। एतेन एव भवतोः हितं सिध्यति'' इति धीरसिंहः तौ नीतिं बोधितवान्।

एतत् श्रुत्वा तौ गन्धर्वौ उक्तवन्तौ– ''चिरकालात् अनुवर्तमानं वैरं भवान् निवारितवान्। मैत्रीं च उपस्थापितवान्। भवदीयम् उपकारं कदापि न विस्मरावः। प्रत्युपकाररूपेण आवाभ्यां किं करणीयम् इति वदतु। आवां ऋणमुक्तौ भवितुम् इच्छावः'' इति।

धीरसिंहः आत्मनः आगमनस्य कारणं निवेदितवान्। ''भवदुक्तं सत्यम्। एतादृशं वचनम् आवाभ्याम् अपि श्रुतम्। इतः किञ्चिद्दूरं गत्वा दक्षिणतः परिवृत्य गच्छतु। तत्र भवान् एकं तटाकं पश्यति। अग्रे किं करणीयम् इति भवान् तत्र एव ज्ञास्यति।

भवतः विजयः तु निश्चयेन भविष्यति" इति आशिषा अनुगृह्य ततः अदृश्यतां गतवन्तौ तौ।

धीरसिंहः तयोः सूचनानुसारं अग्रे गत्वा तटाकं दृष्टवान्। सः विश्रान्त्यर्थं तटाकस्य तीरे शिलायाः उपरि उपविष्टवान्। तावता तटाकात् काचित् मत्स्यकन्या उत्थाय आगतवती। धीरसिंहस्य हस्तं गृहीत्वा तम् उत्थाप्य तटाकस्य अन्तः नीतवती।

तटाकस्य अन्तः रमणीयम् उद्यानम् आसीत्। सुदीर्घायां कुल्यायां विमलं जलं सशब्दं प्रवहति स्म। तत्रत्यप्रदेशः तृणमयेन वस्त्रकटेन आच्छन्नः इव भासते स्म। उद्याने भव्यं भवनं दृश्यते स्म।

मत्स्यकन्या धीरसिंहं तस्य भवनस्य विशालस्य मण्डपस्य अन्तः नीत्वा नवरत्नखचिते सिंहासने उपवेशितवती। मण्डपस्य चतुर्षु कोणेषु चतसृणां सुन्दरीणां स्त्रीणां चित्रपटाः आसन्। एकत्र चित्रं न दृश्यते स्म। धीरसिंहम् आनीतवती सा मत्स्यकन्या स्वयम् अपि पञ्चमचित्रपटस्य रूपेण परिवृत्य रिक्तं तत् स्थलं पूरितवती।

किञ्चित्कालं मौनं स्थित्वा धीरसिंहः निर्मानुषं तत् भवनं विहाय बहिः आगतवान्। यदा बुभुक्षा अनुभूता तदा वृक्षेषु स्थितानि पक्वानि फलानि अवचित्य खादितवान्। किन्तु तेन बुभुक्षा न शान्ता। कुल्यायां स्थितं जलं यावत् पीतं चेत् अपि पिपासा न शान्ता। तदीया बुभुक्षा पिपासा च यथापूर्वम् आसीत्।

सूर्यास्तः जातः। क्रमशः अन्धकारः





व्याप्तः। धीरसिंहः पुनः अपि भवनं प्रविष्टवान्। यदा सः मण्डपं प्रविष्टवान् तदा दीपाः स्वयं प्रकाशिताः जाताः। भित्तौ स्थितेषु पञ्चसु चित्रेषु स्थिताः स्त्रियः सजीवाः सत्यः धीरसिंहं परितः सञ्चरन्त्यः गायन्त्यः नृत्यं कर्तुम् आरब्धवत्यः। समग्रा रात्रिः नृत्येन गीतेन विनोदेन च यापिता। प्रातःकालारम्भे ताः स्त्रियः चित्रपटं प्रविश्य चित्ररूपेण स्थितवत्यः। तानि चित्राणि यथापूर्वं भित्तौ स्थितानि दृश्यन्ते।

धीरसिंहः अत्याश्चर्येण भवनं समग्रं परिशील्य परीक्षितवान्। कस्माच्चित् रन्धतः काश्चन पिपीलिकाः पङ्क्तिरूपेण आगच्छन्त्यः आसन्। धीरसिंहः भित्तिम् अङ्गुल्या ताडयित्वा परीक्षितवान्। भित्तेः अपरस्मिन् पार्श्वे रिक्तता अस्ति इति तेन तर्कितम्। झटिति सः भित्तिं पातितवान्। तत्र तेन काचित् प्राचीना कुञ्चिका, अन्यत् वस्तु च लब्धम्। तस्याः कुञ्चिकायाः आधारेण भवनस्थानां सर्वेषां प्रकोष्ठानां तालम् उद्घाटयितुं सः प्रयत्नं कृतवान्। किन्तु कस्यापि प्रकोष्ठस्य द्वारम् उद्घाटयितुं सः न शक्तवान्। अन्ते अन्तिमस्य प्रकोष्ठस्य तालं कथञ्चित् उद्घाटयितुं शक्तवान् सः।

तस्मिन् प्रकोष्ठे अल्पा काचित् पेटिका आसीत्। सा पेटिका अपि कीलिता एव। तस्याः पेटिकायाः तालस्य उद्घाटनार्थं कुञ्चिकाम् अन्विष्टवान्। एतदर्थम् अटनसमये तस्य पादः कयाचित् कुञ्चिकया घट्टितः। तदनन्तरक्षणे सा अयःपेटिका उद्घाटिता जाता। पेटिकायाः अन्तः ताम्रपटः आसीत्। तत्र कानिचन अक्षराणि दृष्टानि। "अत्रत्यं सर्वं माया। एतस्य उद्यानस्य मध्ये स्थितं सुवर्णवृक्षम् उत्पाटयितुं यः शक्नोति तादृशः वीरः एव एतां मायां ज्ञातुं शक्नोति" इति तस्मिन् ताम्रपटे लिखितम् आसीत्।

धीरसिंहः उत्साहेन भवनात् निर्गत्य उद्यानं प्रविष्टवान्। ताम्रपटे यथा निर्दिष्टं तथैव उद्यानस्य मध्ये सुवर्णवृक्षः आसीत्। तस्य उत्पाटनार्थं बहुधा प्रयत्नं कृतवान् धीरसिंहः। किन्तु तेन सफलता न प्राप्ता।

किञ्चिदनन्तरं तस्य दृष्टिः वृक्षपार्श्वे स्थितस्य सुवर्णसस्यस्य उपरि पतिता।

धीरसिंहः तत्सस्यम् उत्पाट्य दूरे क्षिप्तवान्। अनन्तरक्षणे सः महान् सुवर्णवृक्षः 'लट्लट्' इति शब्देन सह पतितः। पतनशब्दं श्रुत्वा आघातं प्राप्य धीरसिंहः मूर्च्छां गतः।

पुनरपि क्षणकालस्य अनन्तरं धीरसिंहः सचेतनः जातः। सः नेत्रे निमील्य परितः दृष्टिं प्रसारितवान्। इदानीं तत्र न उद्यानम् अस्ति, न वा सुन्दरं भवनम्। याः कन्यकाः रात्रौ तं परितः गायन्त्यः नृत्यं कृतवत्यः आसन् ताः इदानीं तस्य समीपम् आगत्य स्थितवत्यः।

"काः भवत्यः? किम् एतत् प्रवर्तते? एषा माया कथं प्रवर्तते? किमर्थं च प्रवर्तते?" इति धीरसिंहः ताः पृष्टवान्।

"वयम् इतः दशयोजनदूरे स्थितस्य मायावतीनगरस्य राजकुमार्यः। प्राप्तवयस्काः वयम् 'अस्माकं विवाहः निर्वर्तनीयः' इति पितरं प्रार्थितवत्यः। अस्माकं विवाहविषयिणीं त्वरां दृष्ट्वा सः कुपितः। सः अस्मान् एतस्मिन् मायाभवने बन्धने स्थापितवान्। वयं विवेकं प्राप्य क्षमां प्रार्थितवत्यः। तदा सः उक्तवान्– 'यः भवतीः एतस्मात् मायाभवनात् विमोचयितुं शक्नोति सः एव योग्यः वरः' इति। तादृशस्य वीरस्य प्रतीक्षां कुर्वत्यः आस्म। चिरकालात् अनन्तरं मायायाः भेदने समर्थं महानुभावं भवन्तं दृष्टवत्यः। इदानीं भवान् अस्मान् परिणयतु इति प्रार्थयामहे" इति उक्तवत्यः ताः कन्यकाः।

"अहम् अन्यस्याः समस्यायाः समाधानस्य अन्वेषणार्थम् उद्युक्तः अस्मि।



विवाहादिविषयं चिन्तयितुं मम इदानीं सर्वथा समयावकाशः नास्ति। भवतीनां प्रार्थना निराकृता यत् तदर्थं क्षन्तव्यः अहम्" इति उक्त्वा धीरसिंहः अग्रे गतवान्।

किञ्चिद्दूरम् अग्रे गमनानन्तरं सः श्रुतवान्– "सकृत् दृष्टवान्, पुनः द्रष्टव्यम् इति आशा अस्ति" इति।

यतः स च ध्वनिः आगतः तस्यां दिशि वेगेन गतवान् धीरसिंहः। तत्र वृक्षस्य अधः कश्चित् राजकुमारः उपविष्टः आसीत्। सः अतीव क्षीणः आसीत्।

"कः भवान्? किमर्थम् एवं क्षीणं जातः?" इति तं पृष्टवान् धीरसिंहः।

"अत्र समीपे एव मायामन्दिरम् अस्ति। तत् प्रविष्टेषु राजकुमारेषु अहम् अपि अन्यतमः। मायाभवने स्थितासु राजकुमारीषु कस्याश्चित् सौन्दर्येण नितराम् आकृष्टः अहम्। ताम् एव परिणेतुम् इष्टवान्। किन्तु तस्मात् भवनात् कदाचित् बहिरागतः पुनः तं भवनं प्रतिगन्तुं मार्गं ज्ञातुम् अशक्नुवन् बहुधा अटनेन अपि साफल्यम् अप्राप्य श्रान्त्या एवम् उपविष्टवान् अस्मि। याम् अहं परिणेतुम् इष्टवान् तां सकृत् दृष्टवान्। सा पुनः द्रष्टव्या इति महती इच्छा। किन्तु तस्याः इच्छायाः पूर्तिः भवति वा न वा इति न जानामि" इति उक्तवान् सः राजकुमारः।

धीरसिंहः तं राजकुमारम् आत्मना सह नीत्वा मायाभवनं पुनः प्रविष्टवान्। सः राजकुमारः यस्याम् अनुरक्तः, तस्याः तस्य च विवाहं निर्वर्तितवान्।

अनन्तरं धीरसिंहः कौशाम्बीनगरं प्रत्यागत्य सुलोचनायाः समीपं गत्वा आत्मना दृष्टं समग्रं निवेद्य तया सूचितं वचनं कुतः आगच्छति इति, तस्य वचनस्य तात्पर्यं किम् इत्यपि सविस्तरम् उक्तवान्।

सुलोचना एतत् श्रुत्वा– "भवता मया पृष्टस्य प्रथमप्रश्नस्य उत्तरं सम्यग् एव उक्तम्। इतःपरं तादृशं वचनं न श्रूयते। द्वितीयं प्रश्नं श्वः श्रावयिष्यामि" इति उक्त्वा धीरसिंहं विश्रान्तिगृहं प्रति प्रेषितवती।





# पञ्च प्रश्नाः

[२]

विश्रान्त्यादिकं समाप्य धीरसिंहः अनन्तरदिने सुलोचनासमीपम् आगतवान्। सुलोचना तं गौरवेण स्वागतीकृत्य उचिते आसने उपवेश्य उक्तवती– "इतः पश्चिमदिशि त्रिंशद्योजनदूरे काचित् नदी प्रवहति। तस्याः नद्याः जलं सदा रक्तमयं दृश्यते। तथा किमर्थं दृश्यते? सा नदी कुतः प्रवहति? तस्याः नद्याः रहस्यं किम्? एषः एव मम द्वितीयः प्रश्नः। एतस्य युक्तम् उत्तरं ज्ञात्वा आगत्य वदतु" इति।

धीरसिंहः नवदिनात्मकम् अवधिं स्वीकृत्य अश्वम् आरुह्य पश्चिमदिशि प्रयाणम् आरब्धवान्। एवं गच्छन् सः किञ्चन अरण्यं प्राप्तवान्। अरण्यमार्गेण गच्छन् सः रक्तवर्णेन जलेन युक्तां नदीं दृष्टवान्। एषा एव रक्तनदी इति ज्ञातवान् सः।

सः अश्वात् अवतीर्य पादाभ्यां तीरम् अनुसृत्य अग्रे गतवान्। सायङ्काले सूर्यः अस्ताचलस्य शिखरे स्थितः, सागरे मज्जनार्थं सन्नाहं कुर्वन् आसीत्। तत्समये धीरसिंहः लघुपर्वतस्य उपरि स्थितस्य कासारस्य समीपं गतवान्। तस्मात् कासारात् एव नदी उद्गता इत्येतम् अंशं ज्ञातवान् सः।

तस्मिन् कासारे वृष्टिः इव बिन्दुरूपेण रक्तं पतत् आसीत्। धीरसिंहः उपरि दृष्टिं प्रसारितवान्। कासारस्य मध्यभागे स्थितस्य



महावृक्षस्य असङ्ख्याः शाखाः सर्वत्र प्रसृताः आसन्। तासु शाखासु स्त्रीणां मुखानि उत्तोलितानि दृश्यन्ते स्म। सर्वेभ्यः मुखेभ्यः धाराकारेण रक्तं स्रवति स्म। एतत् भीभत्सरूपं रोमञ्चकरं घोरं दृश्यं दृष्ट्वा धीरसिंहः "हा हन्त!" इति उद्‌गारं प्रकटितवान्।

धीरसिंहः एतत् घोरं दृश्यं तदेकदृष्ट्या पश्यन् एतस्य पृष्ठभूमिः का स्यात् इति सगम्भीरम् आलोचयन् आसीत्। अत्रान्तरे सूर्यास्तकारणतः अन्धकारः व्याप्तः। किन्तु पुनः अल्पे एव काले स च प्रदेशः विलक्षणया कान्त्या आवृतः। सा च कान्तिः कुतः आगच्छति इति न जानाति धीरसिंहः।

वृक्षशाखासु लम्बमानानि मुखानि धीरसिंहं दृष्ट्वा विकटाट्टहासम् अकुर्वन्। धीरसिंहः आश्चर्येण एतत् पश्यति। हासयुक्तानि तानि मुखानि एकैकशः अधः कासारे पतितानि। सर्वाणि मुखानि यदा पतितानि तदा सरोवरस्थं रक्तम् अदृश्यम् अभवत्। सरोवरमध्ये इदानीम् अपूर्वम् उन्नतं भवनं दृश्यते। भीकरः कासारः कथम् अदृश्यतां गतः इति न जानाति धीरसिंहः।

तस्मिन् भवने सुन्दरे विशाले च मण्डपे रत्नखचितं सिंहासनम् आसीत्। क्षणाभ्यन्तरे सखीभिः परिवृता काचित् सौन्दर्यखनी राज्ञी सिंहासनम् आरुह्य उपविश्य गाम्भीर्येण परितः दृष्टिं प्रसारितवती।

तदा काश्चन परिचारिकाः पञ्चभक्ष्य-परमान्नोपेतं भोजनम् आनीय सर्वाभ्यः परिवेषितवत्यः। ताः स्त्रियः दूरस्थं धीरसिंहं दृष्ट्वा सङ्केतेन भोजनार्थम् आहूतवत्यः। धीरसिंहस्य तु महती बुभुक्षा आसीत् एव। अतः सः गत्वा आसने उपविश्य भक्ष्याणि खादन् ताः पृष्टवान्– "भवत्यः काः? किम् एतत् विचित्रम्?" इति।

कस्याश्चित् अपि उत्तरं न आगतम्। धीरसिंहः पुनः पुनः तं प्रश्नं पृष्टवान्। तदानीम् अपि मौनम् एव उत्तरम्। भोजनकूटस्य समाप्तेः अनन्तरं ताः नृत्यं कृतवत्यः। तासां गानात् एकं तु निश्चितं यत् ताः मूकाः न इति। 'किमर्थम् एताः स्वविषये किमपि न वदन्ति? प्रायः कस्माच्चित् भीतिः

स्यात् एतासाम्' इति आलोचितवान् धीरसिंहः।

प्रातःकालसमये तत् भवनं रिक्तं जातम्। पुनश्च कासारः तत्र दृष्टः। धीरसिंहः यथापूर्वं कासारस्य तीरे स्थितः आसीत्। स्त्रियः तु पुनरपि मुण्डरूपेण परिवृत्ताः सत्यः वृक्षस्य शाखायां लम्बमानाः आसन्। तासां कण्ठभागतः यथापूर्वं रक्तधारा प्रवहति स्म।

'कासारस्य रात्रौ एकं रूपं चेत् दिने अपरं रूपम्। एतस्य रहस्यं ज्ञातव्यम् एव' इति दृढनिश्चयं कृत्वा धीरसिंहः परितः परीक्षादृष्ट्या दृष्टवान्। दिगन्तपर्यन्तम् अपि तेन न कश्चित् दृष्टः। अतः सः साक्षात् पश्चिमदिशि प्रयाणम् अनुवर्तितवान्।

किञ्चिद्दूरं गमनानन्तरं तेन काचित् गुहा दृष्टा। धीरसिंहः अवनम्य गुहायाः अन्तः दृष्टिं प्रसारितवान्। गुहायां कश्चन मुनिः नेत्रे निमील्य ध्याने निमग्नः आसीत्। सः मुनिः तपसः साक्षात्मूर्तिः इव दृश्यते स्म। धीरसिंहः गुहायाः अन्तः गत्वा मुनिं साष्टाङ्गं नमस्कृतवान्।

मुनिः मन्दं नेत्रे उद्घाट्य पृष्टवान्– "कः भवान्?" इति। धीरसिंहः आत्मनः परिचयं सविस्तरं निवेद्य आगमनकारणम् अपि निवेद्य मुनिम् उक्तवान्– "भवादृशस्य महात्मनः अनुग्रहः अस्ति चेत् असाध्यानि कार्याणि अपि सिद्धानि भवन्ति। अतः मम मनोभीष्टं पूरितं यथा भवेत् तथा वरेण अनुगृह्णातु" इति।



"वत्स! राज्ञीसदृशी परमसुन्दरी काचित् युवतिः भवता दृष्टा खलु? तस्याः नाम सुनन्दिनी इति। सा अग्निकुम्भनामकस्य महामान्त्रिकस्य भागिनेयी। प्राप्तवयस्का सा कञ्चित् तरुणं परिणेतुं सङ्कल्पितवती आसीत्। अग्निकुम्भः तत् निराकृतवान्। कोपेन सः तां तस्याः सखीः च मायया बद्धवान्। यदा अग्निकुम्भः मरणं प्राप्स्यति तदा एव सुनन्दिनी अपि मायाबन्धात् विमुक्ता भविष्यति। तस्य महामान्त्रिकस्य अग्निकुम्भस्य मारणार्थं तु अपरिमितं धैर्यम् आवश्यकम्। तादृशः यावत् न लभ्यते तावत् तासां गतिः एवम् एव" इति उक्तवान् मुनिः।

तदा धीरसिंहः विनयेन उक्तवान्–



"मुनिवर्य! भवतः अनुग्रहः यदि स्यात् तर्हि अहं तं महामान्त्रिकम् अग्निकुम्भं मारयित्वा सुनन्दिनीं बन्धविमुक्तां करिष्यामि" इति।

मुनिः धीरसिंहम् आपादमस्तकं परिशील्य– "धीरसिंह! अग्निकुम्भं मारयितुम् अर्हता भवतः अस्ति इति तु सत्यम् एव। किन्तु अग्निकुम्भः महाक्रूरी। अन्यच्च वञ्चनादितन्त्रेषु अतिनिपुणः महामान्त्रिकः सः। तस्य मायाप्रभावः भवतः उपरि परिणामं यथा न कुर्यात् तथा कर्तुं एकं मन्त्रम् उपदिशामि। त्रिकरणशुद्ध्या भवान् एतं मन्त्रं पठति चेत् तं सुलभतया जेतुम् अर्हति" इति उक्त्वा धीरसिंहस्य कर्णे मन्त्रम् उपदिष्टवान्।

धीरसिंहः मुनिं कृतज्ञतापूर्वकं नमस्कृतवान्। मुनिः तस्य शिरसि दण्डं स्थापयित्वा मन्त्रं जपन् मन्दं चालितवान्। तस्य प्रभावतः धीरसिंहः आकाशचुम्बिनः महापर्वतस्य मूले गत्वा स्थितवान्।

स च पर्वतः चित्रविचित्रैः रमणीयैः पुष्पैः अलङ्कृतः आसीत्। 'मुनिना सूचितम् अग्निकुम्भस्य दुर्गम् एतस्य पर्वतस्य उपरि स्यात्' इति आलोच्य धीरसिंहः पर्वतम् आरोढुम् उद्युक्तः जातः। तदा क्रूराः व्याघ्राः, सिंहाः, भल्लूकाश्च गर्जनं कुर्वन्तः धीरसिंहस्य उपरि आक्रमणं कृतवन्तः। धीरसिंहः अविचलः सन् मुनीश्वरेण उपदिष्टं मन्त्रं त्रिवारं मनसि उच्चारितवान्। तदा ते क्रूरा मृगाः अदृश्यतां गतवन्तः। 'जयतु मुनीश्वरः' इति वदन् धीरसिंहः अग्रे गतवान्।

किञ्चिदग्रे यदा गतं तदा धीरसिंहस्य पादौ भूमौ दृढं लग्नौ जातौ। सः एकम् अपि पदम् अग्रे स्थापयितुं न शक्तवान्। एतदपि महामान्त्रिकस्य मायायाः प्रभावः इति आलोच्य धीरसिंहः मुनेः मन्त्रं जपितवान्। तदा सः यथापूर्वं चलितुं शक्तः अभवत्।

पर्वतस्य उपरि उपविष्टः अग्निकुम्भः धीरसिंहस्य आगमनं मायादृष्ट्या ज्ञातवान् एव। धीरसिंहः कः, किमर्थम् आगच्छन् अस्ति इत्यादिकं पूर्णतः जानाति सः। अतः सः, धीरसिंहः उपरि यथा न आगच्छेत् तथा एकम् उपायं कृतवान्। स्वमायाजालेन

मायासुनन्दिनीं सृष्ट्वा, काश्चन सखीः अपि सृष्ट्वा, ताः सर्वाः धीरसिंहसमीपं प्रेषितवान्।

सखीभिः परिवृता मायासुनन्दिनी मन्दहासं प्रकटयन्ती धीरसिंहस्य अभिमुखम् आगतवती। ताः दृष्ट्वा धीरसिंहः– "अहो आश्चर्यम्! कासारमध्ये वृक्षे मुण्डरूपेण लम्बमानाः भवत्यः एतावच्छीघ्रं कथम् अत्र आगतवत्यः? महामुनेः मन्त्रप्रभावतः किं बन्धविमुक्ताः जाताः?" इति पृष्टवान्।

"एतत् मम मातुलस्य दयया सम्पन्नम्। सः करुणया अस्मान् बन्धविमुक्ताः कृतवान्। आगच्छतु अस्माभिः सह। सन्तोषकूटे भागं गृह्णातु नाम" इति हसन्ती उक्तवती मायासुनन्दिनी।

धीरसिंहः तस्याः वचने विश्वस्य ताम् अनुसृतवान्। सा मधुरैः वचनैः धीरसिंहं मोहयन्ती विषमिश्रितं पानीयं पायितवती। एतेन धीरसिंहः मूर्च्छां गतवान्।

मायासुनन्दिनी तं मायया बद्ध्वा अग्निकुम्भस्य पुरतः स्थापितवती। अग्निकुम्भः धीरसिंहं तीक्ष्णदृष्ट्या पश्यन्– "एतं परमदुष्टं बद्ध्वा ज्वालाकूपे पातयन्तु नाम" इति कठोरम् आज्ञप्तवान्।

अत्रान्तरे धीरसिंहः सचेतनः जातः। सः प्रवृत्तां वञ्चनां ज्ञातवान्। सः मुनिवरेण बोधितं मन्त्रं जपितवान्। अतः सः ज्वालाकूपे पातितः चेदपि अक्षतः एव स्थितवान्। मल्लिकाशय्यातः उत्थितः इव धीरसिंहः सुरक्षितं ज्वालाकूपतः बहिः आगतवान्।

एतत् दृष्ट्वा इतोऽपि कुपितः अग्निकुम्भः





"एतं पुनरपि बद्ध्वा कारागारे स्थापयन्तु" इति भटान् आज्ञापितवान्।

कारागारं गतः धीरसिंहः— 'कस्यचित् मैत्रीं विना अत्रत्यस्य रहस्यस्य भेदनम् अशक्यम्' इति आलोच्य कारागाररक्षकेण सह मधुरवार्तालापम् आरब्धवान्। वार्तालापेन तेन ज्ञातं यत् तस्य नाम करुणाकरः इति। सः अपि अग्निकुम्भं द्वेष्टि इति, गत्यन्तराभावात् तदधीनः जातः इति च। सुनन्दिनी एतम् एव परिणेतुम् इष्टवती आसीत् इत्यपि तेन ज्ञातम्। अतः धीरसिंहः तम् उक्तवान्— "भोः! इदानीं भवान् यत् मिलितः तत् लाभाय एव इति अहं भावयामि। मां भवान् कारागारतः यदि मोचयेत् तर्हि अहम् अग्निकुम्भं मारयित्वा सुनन्दिनीं भवता सह योजयामि" इति।

तदा करुणाकरः सन्देहेन उक्तवान्— "भोः, अग्निकुम्भस्य मारणं तथा सुलभतया न भवति। सः महाक्रूरी मान्त्रिकः च। सः दुर्गे सुरक्षितरूपेण निवसति। अन्यच्च तेन स्वमायया त्रिंशत्सहस्रपादोन्नतं मेघमण्डलं किञ्चन निर्मितम् अस्ति। यदा अपायः आपतति तदा सः मेघमण्डलं प्रविशति। केनापि तत्र गन्तुं न शक्यते एव" इति।

"दुष्टस्य तन्त्राणि मानवशक्त्यतीतानि भवन्तु नाम। किन्तु धर्ममार्गेण यः कार्यं करोति तस्यैव जयः भविष्यति। एतत् तु त्रिकालाबाधितं सत्यम्। अतः भवान् मां प्रथमं बन्धविमुक्तं करोतु। दुर्गस्य स्थलं सूचयतु च। अनन्तरं यत् करणीयं तत् अहं करिष्यामि" इति उक्तवान् धीरसिंहः।

करुणाकरः धीरसिंहस्य वचनेन धैर्येण च तृप्तः सन् सन्तोषेण कारागारस्य द्वारम् उद्घाटितवान्। धीरसिंहेन सह अग्निकुम्भस्य दुर्गस्य दिशि प्रस्थितवान् च।

मार्गे अनेके विचित्राः वृक्षाः दृष्टिगोचराः जाताः। तान् प्रदर्शयन् उक्तवान् करुणाकरः— "वस्तुतः एते वृक्षाः न। ये मारयितुम् आगताः तान् स्वमन्त्रशक्त्या एवं वृक्षरूपेण बन्धने स्थापितवान् अस्ति अग्निकुम्भः" इति।

धीरसिंहः मुनीश्वरं भक्त्या स्मरन् एते वृक्षाः निजरूपेण तिष्ठन्तु' इति वदन् मन्त्रं

जपितवान्। अनन्तरक्षणे सर्वे वृक्षाः मानवरूपेण स्थितवन्तः। ते सर्वे परमसन्तोषेण सैनिकाः इव धीरसिंहस्य साहाय्यार्थम् उद्युक्ताः जाताः।

दुर्गस्य अन्तः उपविष्टः राक्षसः स्वमायाशक्त्या सैन्येन सह आगच्छन्तं धीरसिंहं दृष्टवान्। तत्क्षणे सः स्वमायया तं प्रदेशम् अन्धकारावृतं कृतवान्। समग्रः पर्वतः कम्पमानः जातः। एतत् दृष्ट्वा धीरसिंहेन सह स्थिताः भीत्या हाहाकारं कृतवन्तः। तदा धीरसिंहः मुनिना उपदिष्टं मन्त्रं जपितवान्। पर्वतस्य कम्पनं स्थगितम्। अन्धकारः दूरङ्गतः।

अनन्तरम् अग्निकुम्भः मायाशक्त्या धीरसिंहस्य परिवारे फूत्कुर्वतः सर्पान् सृष्टवान्। तीव्रां ज्वालां, घोरं धूमं चापि सृष्टवान्। एतत्सर्वं धीरसिंहः मुनीन्द्रेण उपदिष्टेन मन्त्रेण दूरीकृतवान्।

इतः परं किमपि कर्तुम् अशक्तः अग्निकुम्भः दुर्गात् अदृश्यः भूत्वा मेघमण्डलं प्रविष्टवान्।

धीरसिंहस्य सैन्यम् दुर्गस्य अन्तः प्रवेशम् अकरोत्। तत्र सुवर्णमयानि भवनानि, सुन्दराणि उद्यानानि च आसन्। स च प्रदेशः निर्मानुषः चेदपि तत्र अत्युत्कृष्टाः आहारपदार्थाः सिद्धाः आसन्। धीरसिंहस्य सहचराः नितरां बुभुक्षिताः आसन्। ते तम् आहारं खादित्वा शिरोभ्रमणं प्राप्य अधः पतितवन्तः। धीरसिंहः समीपस्थात् सरोवरतः जलम् आनीय मुनिना उपदिष्टेन



मन्त्रेण अभिमन्त्र्य तेन सर्वेषाम् उपरि सेचनं कृतवान्। सर्वे निद्रातः इव उत्थाय उपविष्टवन्तः। करुणाकरस्य सूचनानुसारं धीरसिंहः दुर्गात् बहिः आगत्य शिलायाः उपरि उपविश्य आकाशं पश्यन् मुनिना उपदिष्टं मन्त्रं पुनः पुनः जपन् 'राक्षसस्य मेघमण्डलं नश्यतु' इति प्रार्थितवान्। अनन्तरक्षणे मेघमण्डलं सशब्दं भग्नं खण्डशः भूमौ पतितम्। अग्निकुम्भः अपि भूमौ पतितः सन् शिरसः भङ्गेन प्राणान् त्यक्तवान्। सर्वे हर्षोद्गारं कृतवन्तः।

अनन्तरं धीरसिंहः दुर्गरक्षणार्थं कांश्चन नियुज्य रक्तकासारस्य दिशि गतवान्। अत्रान्तरे सुनन्दिनी सखीभिः सेविकाभिः च परिवृता दुर्गस्य दिशि एव आगच्छन्ती दृष्टा। महामान्त्रिकस्य अग्निकुम्भस्य मरणात् सा मायाबन्धात् विमुक्ता आसीत्।

समीपम् आगतां सुनन्दिनीम् उक्तवान् धीरसिंहः– "एतत् सर्वं मुनीन्द्रस्य अनुग्रहात् सम्पन्नम्। तस्य अनुग्रहात् एव निमित्तमात्रम् अहम् अग्निकुम्भं मारितवान्। अतः एव भवती मायाबन्धात् विमुक्ता जाता। इतःपरं भवती प्रियतमं करुणाकरं परिणीय सुखेन चिरकालं जीवतु" इति।

अनन्तरं धीरसिंहः सहचराणां साहाय्येन सुनन्दिनी-करुणाकरयोः विवाहं सवैभवं निर्वर्तितवान्। एतं कार्यक्रमं समाप्य सः महामहिमशालिनः मुनेः समीपं गत्वा तं साष्टाङ्गं नमस्कृत्य प्रवृत्तं समग्रं निवेदितवान्। मुनेः अनुज्ञां प्राप्य कौशाम्बीं प्रत्यागतवान् च।

सुलोचनां दृष्ट्वा धीरसिंहः रक्तनद्याः उत्पत्तिकारणं सविस्तरं निवेदितवान्। तदा सुलोचना– "भवता उक्तं सत्यम् एव। तस्य मान्त्रिकस्य मरणस्य अनन्तरं तस्यां नद्यां निर्मलं जलं प्रवहति इति मया श्रुतम्। भवान् विश्रान्तिं स्वीकृत्य श्वः मां पश्यतु। तृतीयं प्रश्नं श्रावयामि" इति उक्त्वा धीरसिंहम् अतिथिगृहं प्रति प्रेषितवती।

–(अनुवर्तते)





# पञ्च प्रश्नाः

[३]

अनन्तरदिने धीरसिंहः तृतीयं प्रश्नं ज्ञातुम् इच्छन् सुलोचनायाः समीपं गतवान्। सुलोचना तं सहार्दं स्वागतीकृत्य उक्तवती— "इतः दक्षिणदिशि प्रत्यमावास्यं मध्यरात्रसमये कश्चन आर्तस्वरः श्रूयते— 'हा हन्त! सत्कार्यं किमपि कर्तुम् अशक्नुवतः मम एषा अमावास्या अपि अतिक्रामति खलु?' इति। कस्य आर्तस्वरः एषः? किमर्थं च श्रूयते? इति अंशद्वयं ज्ञात्वा आगत्य वक्तव्यम्। एषः एव मम तृतीयः प्रश्नः" इति।

धीरसिंहः क्षणकालम् आलोच्य मासत्रयस्य अवधिं स्वीकृत्य दक्षिणदिशम् अनुसृतवान्।

निरन्तरं गच्छन् दिनत्रयं यावत् अहोरात्रं प्रयाणं कृतवान्। चतुर्थे दिने घोरम् अरण्यम् उपस्थितम्। अश्वप्रयाणं तत्र सर्वथा असाध्यम् आसीत्। अतः सः अश्वम् अरण्यसमीपस्थे शाद्वले परित्यज्य पादेन गच्छन् हस्तेन लताकण्टकादिकम् अपसारयन् प्रयाणम् अनुवर्तितवान्। एवं दिनत्रयं यावत् गमनेन अरण्यम् अतिक्रान्तम् अभवत्।

ततः सुदूरे किञ्चन नगरं दृष्टं तेन। तस्य दर्शनेन प्रयाणायासः सर्वथा परिहृतः इव। सः उत्साहेन पदानि स्थापयन् नगरम् उद्दिश्य



गतवान्।

नगरस्य प्रवेशद्वारस्य समीपे एव विचित्रवेषधारिणौ रक्षकभटौ तस्य समीपं वेगेन आगतवन्तौ। नामकुलादिकम् आगमनकारणादिकं वा किमपि अपृष्ट्वा तस्य बन्धनार्थम् उद्युक्तौ जातौ।

"किम् एतत्? मया कः अपराधः कृतः? किमर्थं मां बद्धुम् उद्युक्तौ भवन्तौ?" इति आश्चर्येण पृष्टवान् धीरसिंहः।

किन्तु राजभटौ उत्तरं किमपि अनुक्त्वा तं बद्ध्वा महाराजसमीपं नीतवन्तौ। अग्रे प्रवर्तिष्यमाणस्य विषये कुतूहली धीरसिंहः विशेषतः विरोधं किमपि न प्रकटितवान्।

भटैः बद्ध्वा आनीतं धीरसिंहं पृष्टवान् राजा— "कः भवान्? कः देशः भवतः? अस्माकं नगरं किमर्थं प्रविष्टवान्?" इति।

"अहं नेपालदेशस्य राजकुमारः। धीरसिंहः इति मम नाम। प्रमुखस्य कस्यचित् राजकार्यस्य निमित्तं भवन्नगरम् अतिक्रम्य मया गन्तव्यम् अस्ति। निरपराधिनं मां भवदीयौ भटौ विना कारणं बद्ध्वा अत्र आनीतवन्तौ। अनुचितम् एतत्" इति उक्तवान् धीरसिंहः।

तदा राज्ञः पार्श्वे उपविष्टः मन्त्री उक्तवान्— "धीरसिंह! अन्यदेशीयः कश्चित् अस्माकं नगरं प्रविशति चेत् अस्माकं राजकुमारी सीमन्तिनी तं त्रीन् प्रश्नान् पृच्छति। युक्तम् उत्तरं वक्तुं यः न शक्नोति सः मरणदण्डनं प्राप्नोति। उत्तरं वक्तुं समर्थं त्यजामः वयम्। किमपि अनुक्त्वा अन्यदेशीयः बद्ध्वा आनेतव्यः इत्येव राजाज्ञा। एतस्य नगरस्य नाम शिरच्छेदनगरम् इति" इति।

"कीदृशम् अनौचित्यम् एतत्! निरपराधिनः अन्यदेशीयस्य एवं दण्डनम् अन्याय्यम् एव। वस्तुतः अन्याय्यस्य निरोद्धा भवति राजा। अत्र तु राजा एव अन्याय्यम् आचरति! अहो! मृगस्य इव व्यवहारः एषः!" इति उद्गारं प्रकटितवान् धीरसिंहः।

"भवतः वचनं सत्यम्। वयम् अपि एतत् जानीमः। किन्तु वयम् असहायाः अत्र। दुष्टस्य कस्यचित् यक्षस्य शापात् ग्रस्ता अस्ति अस्माकं राजकुमारी। यक्षम् अनुसर्तुम्

अस्माकं राजकुमारी सिद्धा न जाता इत्यतः सः — 'भवद्द्वारा प्रश्नान् प्रच्छयामि। उत्तरम् वक्तुम् असमर्थं मारयिष्यामि। एवम् भवत्याः देशस्य अपकीर्तिं जनयिष्यामि' इति उक्त्वा तथैव कुर्वन् अस्ति। अतः एतादृशः अपवादः सोढव्यः आपतितः। भवान् तां पश्यतु तावत्'' इति उक्त्वा राजा धीरसिंहं सीमन्तिनीसमीपं नीतवान्।



राजकुमारी सीमन्तिनी धीरसिंहं दृष्ट्वा पितरं पृष्टवती— ''कः एषः? मम प्रश्नानां योग्यम् उत्तरं दातुं समर्थः आगतः वा?'' इति।

''तादृशः एव एषः इति भावयाम। प्रश्नान् क्रमशः पृच्छतु तावत्'' इति उक्तवान् राजा।

''मयि शङ्का मास्तु। निस्सङ्कोचं प्रश्नं पृच्छतु'' इति सीमन्तिनीम् उक्तवान् धीरसिंहः।

''फलेषु अतिश्रेष्ठं मधुरतमं फलं किम्?'' इति पृष्टवती सीमन्तिनी।

''सन्तानफलम्'' इति झटिति उत्तरं दत्तवान् धीरसिंहः।

''केनापि न इष्यमाणम्, अनिवार्यतया अनुभोक्तव्यं च किम्?'' इति सीमन्तिनी द्वितीयं प्रश्नं पृष्टवती।

धीरसिंहः क्षणकालम् आलोच्य उक्तवान्— ''मरणम्'' इति।

''भोः, मम तृतीयं प्रश्नं शृणोतु। यत् अस्ति चेत् सर्वम् अपि अस्ति इव, यत् नास्ति चेत् विद्यमानम् अपि अप्रयोजकम् इव भवति, तत् किम्?'' इति पृष्टवती सीमन्तिनी।

''बुद्धिबलम्'' इति उत्तरं दत्तवान् धीरसिंहः।

अनन्तरक्षणे एव सीमन्तिनी उच्चैः आक्रोशनं कुर्वती विकटाट्टहासं प्रदर्शयन्ती च मूर्च्छां गतवती। तस्याः शरीरतः कृष्णवर्णीयः सर्परूपः कश्चन आकारः बहिः आगतः।

धीरसिंहः झटिति तस्याः आकृतेः शिरः बलात् गृहीत्वा कलशे स्थापयित्वा कलशस्य मुखम् आवरणेन सम्यक् पिधाय कलशं भूमौ निखानितवान्।

अनन्तरं सीमन्तिनी सचेतनतां प्राप्य मन्दं नेत्रे उन्मील्य— ''किं प्रवृत्तम्? किम् एतत्?'' इति पृच्छन्ती उत्थाय पितुः पार्श्वे



स्थितवती।

राजा आनन्दाश्रूणि स्रावयन् धीरसिंहस्य हस्तौ गृहीत्वा– "मम प्रियपुत्रीं दुष्टयक्षस्य बन्धनात् मोचितवान् भवान्। माम् अपि निन्दातः मोचितवान्। भवतः उपकारम् आजीवनं स्मरामि अहम्" इति सगद्गदम् उक्तवान्।

"सर्वम् दैवेच्छा। मया कर्तव्यं पालितं, तावदेव। निश्चिन्ताः भवन्तु भवन्तः। अहं कार्यविशेषस्य सिद्ध्यर्थं गच्छामि तावत्" इति उक्त्वा आत्मना उद्दिष्टं कार्यं महाराजं निवेदितवान्।

तदा महाराजः– "आं, तादृशः कण्ठस्वरः अस्माभिः अपि श्रुतः। किन्तु सः कुतः आगच्छति इति न जानीमः। बुद्धिशाली साहसी च भवान् निश्चयेन सफलः भविष्यति" इति आशिषा अनुगृह्य धीरसिंहं प्रेषितवान्।

धीरसिंहः दक्षिणदिशि प्रयाणम् अनुवर्तितवान्। दिनत्रयस्य प्रयाणस्य अनन्तरं सः विशालां मरुभूमिं प्राप्तवान्।

तदा तु मध्यरात्रसमयः। सर्वत्र गाढान्धकारः। अमावास्या तिथिः। आकाशे नक्षत्राणि प्रकाशन्ते।

अकस्मात् तत्र झञ्झावातः उत्पन्नः। वलयरूपेण आवर्तमानः सः पुलिनम् आकाशपर्यन्तम् अनयत्। एतन्मध्ये तेन वायुना धीरसिंहः अपि नीतः। दक्षिणदिशि कस्यचित् वृक्षस्य अधः पातितः च। धीरसिंहः उत्थाय नेत्रे उन्मील्य परितः दृष्टिं प्रसारितवान्। तावता तेन अश्वस्य खुरपुटध्वनिः श्रुतः। सः उत्थाय शब्दम् अनुसृत्य दृष्टिं प्रसारितवान्। तदीयः एव अश्वः तेन तत्र दृष्टः। समीपे एव कश्चन लघुपर्वतः आसीत्। अश्वः धावन् पर्वतस्य आरोहणम् अकरोत्। धीरसिंहः अपि अश्वम् अनुसरन् पर्वतम् आरूढवान्। पर्वतस्य अपरपार्श्वे तृणमयः विशालः प्रदेशः आसीत्। अश्वः तत्र तृणानि चरति स्म।

अत्रान्तरे 'टिङ्ग्, टिङ्ग्' इति द्वादश घण्टावादनानि श्रुतानि। विचित्रः प्रकाशः तत्र व्याप्तः। धीरसिंहेन दृष्टं यत् विचित्रेण वेषभूषणेन युताः केचन सैनिकाः इव

भासमानाः निरायुधाः पुरुषाः तं प्रदेशम् आगच्छन्तः सन्ति इति। ते पुरुषाः अमूल्यानि आभरणानि धृतवन्तः आसन्। तेषां शरीरतः सुगन्धः प्रसरति स्म। ते अग्रे आगत्य तृणमये प्रदेशे प्रसारितस्य रत्नकम्बलस्य उपरि पङ्क्तिशः उपविष्टवन्तः।

ततः अनतिदूरे कश्चन वृद्धः उपविष्टः आसीत्। तस्य शरीरं नितरां कृशम्। छिन्नेन वस्त्रेण सः शरीरम् आच्छादितवान् आसीत्। केशाः विकीर्णाः धूलिमयाः च दृश्यन्ते स्म। तस्य मुखात् आर्तस्वरः निर्गतः– "हा हन्त! सत्कार्यं किमपि कर्तुम् अशक्नुवतः मम एषा अमावास्या अपि अतिक्रामति खलु?" इति।

किञ्चित्कालानन्तरं तत्र उपविष्टानां पुरतः सुवर्णस्थालिकाः आगताः। स्थालिकासु भक्ष्यादीनि अपि आगतानि। तेषु अन्यतमः भक्ष्यपूर्णां स्थालिकां प्रदर्शयन् धीरसिंहम् उक्तवान्– "किमर्थं दूरे स्थित्वा पश्यति? आगच्छतु अत्र। सहैव भोजनं करवाम" इति।

धीरसिंहः तस्य आह्वानम् अङ्गीकृत्य कस्याश्चित् स्थालिकायाः पुरतः उपविष्टवान्।

तस्य वराकस्य वृद्धस्य पुरतः तु स्थालिकादिकं किमपि न आसीत्। यदा सर्वे भोजनार्थम् उद्युक्ताः तदा तस्य वृद्धस्य पुरतः मृच्छदखण्डः तदुपरि मृत्तिकपाषाणादयः च आगताः। सर्वे सन्तोषेण भोजनरसास्वादने मग्नाः चेत् सः वृद्धः तु दैन्यपूर्णया दृष्ट्या तान् पश्यति!





एतत् सोढुम् अशक्तः धीरसिंहः तान् सैनिकान् दृष्ट्वा पृष्टवान्– "हन्त! तेन वृद्धेन कः अपराधः कृतः? तस्मै भोजनम् अयच्छन्तः भवन्तः मृत्तिकापाषाणादीनां दानेन किमर्थं तम् उपहसन्ति?" इति।

तदा ते सर्वे एककण्ठेन उक्तवन्तः– "तम् एव पृच्छतु। सः स्वयं वदति" इति।

धीरसिंहः स्वस्य पुरतः स्थितम् आहारं द्विधा विभज्य एकं भागं वृद्धस्य पुरतः स्थापयन् तम् उक्तवान्– "खादतु भोः" इति। किन्तु क्षणमात्रेण तानि आहारवस्तूनि मृत्तिकारूपं प्राप्तवन्ति आसन्।

"किम् एतत् विचित्रम्? किमर्थम् एवं भवति? भवता कःअपराधः कृतः?" इति आश्चर्येण पृष्टवान् धीरसिंहः।

"सा च काचित् कथा। इतः दशयोजनदूरे स्थिते विदिशानामके नगरे निवसन् धनगुप्तनामकः कोट्यधीशः वणिक् आसम् अहम्। अपारा सम्पत्तिः आर्जिता आसीत् मया। किन्तु तदा मया दानधर्मादिकं सर्वथा विस्मृतम् आसीत्। शुनककाकादिभ्यः अपि आहारः न दत्तः मया। ये दानं कुर्वन्ति तान् बहुधा उपहसितवान्। शक्यं चेत् अन्येन क्रियमाणं दानं निवारयामि स्म अपि। कर्मकरेभ्यः योग्यं वेतनं कदापि न दत्तवान्। तान् बहुधा पीडयामि स्म। पञ्चविंशतिवर्षेभ्यः पूर्वं, वाणिज्यार्थं दूरदेशं गन्तुम् इच्छन् उष्ट्राणाम् उपरि मणिमाणिक्यादिकं, पट्टवस्त्राणि च आरोप्य बहुभिः कर्मकरैः सह प्रयाणम् आरब्धवान्। मरुभूमिमार्गे लुण्ठाकाः अस्मान् सर्वान् मारयित्वा अत्रैव निखातवन्तः। इदानीं मम पुरतः सुखेन उपविश्य ये भोजनं कुर्वन्ति ते पूर्वं ममैव सेवकाः आसन्। ते यथाशक्ति दानं कृतवन्तः इत्यतः स्वर्गसुखम् अनुभवन्तः सन्ति। धर्मविरुद्धमार्गेण कृपणवृत्त्या अहं जीवितवान् इत्यतः एषा नरकबाधा मम। ममैव सेवकानां पुरतः एवं नरकदुःखम् अनुभवन् अस्मि" इति वदन् अश्रूणि स्रावितवान् सः वृद्धः।

"एतस्याः दुस्थितेः मोक्षं प्राप्तुं कोऽपि मार्गः नास्ति वा? यदि स्यात् तर्हि वदतु।



यथाशक्ति साहाय्यं करिष्यामि" इति उक्तवान् धीरसिंहः।

"मया सम्पादिता समग्रा सम्पत्तिः मम गृहस्य पृष्ठतः पक्षद्वारात् दशव्यामदूरे गर्ते स्थापिता आसीत्। एतां वार्ताम् अजानन्तः मम त्रयः पुत्राः दारिद्र्यवशात् खिन्नाः सन्ति। भूमिस्थां तां सम्पत्तिं बहिः आनीय चतुर्धा विभज्य भागत्रयं लोकहितार्थम् उपयुज्य शिष्टः भागः मम पुत्रेभ्यः समरूपेण विभज्य दत्तः चेत् मया सद्गतिः प्राप्यते। तदा एव मम एतस्मात् नरकवासतः मोक्षः" इति उक्तवान् वृद्धः धनगुप्तः।

एतत् श्रुत्वा धीरसिंहः ततः साक्षात् विदिशानगरं गत्वा धनगुप्तपुत्रान् दृष्ट्वा धनगुप्तस्य वचनं श्रावितवान्। किन्तु ते एतस्मिन् वचने न विश्वसितवन्तः। धीरसिंहस्य सूचनानुसारं यदा खननं कृतं तदा धनराशिः प्राप्तः। एतेन ते धीरसिंहे विश्वसितवन्तः। अनन्तरं पितुः इच्छानुसारं सम्पत्तिं चतुर्धा विभज्य एकं भागं परस्परं विभज्य स्वीकृत्य भागत्रयं लोकहितार्थम् उपयुक्तवन्तः। तेषां जीवनं सुखमयं जातम्।

अग्रिमायाम् अमावास्यायां धीरसिंहः मरुभूमौ स्थितं पर्वतं गतवान्। तद्दिने तु धनगुप्तः अपि उत्तमैः वेषभूषैः अलङ्कृतः हसन्मुखः सन् सर्वैः सह सन्तोषेण भोजनं कुर्वन् आसीत्। एतत् दृष्ट्वा धीरसिंहः तृप्तिं प्राप्तवान्। धनगुप्तः तु धीरसिंहं दृष्ट्वा कृतज्ञतापूर्वकम् आनन्दाश्रूणि स्रावितवान्।

कृतकृत्यः धीरसिंहः अश्वम् आरुह्य कौशाम्बीं प्रत्यागतवान्। धनगुप्तस्य इतिवृत्तं सुलोचनां श्रावितवान्।

"भवतः वचनं सत्यम्। गतायाम् अमावास्यायां रात्रौ स च आर्तस्वरः न श्रुतः। भवान् न केवलं धीरः शूरः च, अपि तु परोपकारी अपि। श्लाघ्यः गुणः भवतः। श्वः अहं चतुर्थं प्रश्नं श्रावयिष्यामि" इति उक्त्वा सुलोचना धीरसिंहं विश्रान्तिगृहं प्रति प्रेषितवती।

–(अनुवर्तते)





# पञ्च प्रश्नाः

[४]

अनन्तरदिने धीरसिंहः चतुर्थं प्रश्नं ज्ञातुम् इच्छन् सुलोचनायाः समीपं गतवान्। सा तम् आदरेण स्वागतीकृत्य उपवेश्य उक्तवती – "त्रीणि विजयसोपानानि आरूढानि भवता। इदानीं चतुर्थं प्रश्नं शृणोतु तावत्। इतः नैर्ऋत्यदिशि पञ्चाशद्योजनदूरे मायामयः सुगन्धजलतडागः अस्ति। तस्य जन्मकारणं, पूर्णं रहस्यं च ज्ञात्वा आगन्तव्यम्" इति।

धीरसिंहः मासत्रयस्य अवधिं स्वीकृत्य ततः निर्गतवान्। अश्वम् आरुह्य नैर्ऋत्यदिशि सप्ताहं यावत् प्रयाणं कृतवान्। अष्टमे दिने तेन एकं नगरं दृष्टम्। नगरसीमायां कश्चन जीर्णकूपः आसीत्। तं परितः समूहरूपेण स्थित्वा जनाः अन्तः पश्यन्तः आसन्। तेषां मध्ये धनिकौ वृद्धदम्पती सकरुणं रोदनं कुर्वन्तौ आस्ताम्। धीरसिंहः कुतूहलेन तेषां समीपं गत्वा 'किं प्रवृत्तम्?' इति तत्रस्थम् एकं पृष्टवान्।

"अनयोः वृद्धदम्पत्योः एकः एव पुत्रः आसीत्। गुणशेखरः इति तस्य नाम। सः स्वभावेन अतीव समीचीनः। किन्तु गतसप्ताहे केन कारणेन इति न जानीमः, सः उन्मत्तः इव व्यवहरन् गृहात् निर्गत्य एतस्मिन् कूपे पतितवान्। तस्य गमनं निरोद्धुं केनापि न शक्तम्" इति उक्तवान् सः।

"शोचनीया वार्ता एषा! किन्तु मरणात् आत्मानं कः वा रक्षेत्? जातस्य मरणं ध्रुवम्। तथापि अकाले मरणं तु अनुचितम्। सर्वं



दैवाधीनम्। गतस्य विषये एवं विलपनेन किं प्रयोजनम्?" इति अनुकम्पेन उक्तवान् धीरसिंहः।

"किन्तु गुणशेखरस्य मरणे कोऽपि न विश्वसिति। सः मृतः चेत् एतावता शवेन उपरि आगन्तव्यम् आसीत्। कूपस्तु यथापर्वं शान्तः एव दृश्यते" इति उक्तवान् सः पुरुषः।

"एवं वा!" इति उद्गारं प्रकट्य धीरसिंहः क्षणकालस्य मौनस्य अनन्तरं वृद्धदम्पत्योः समीपं गत्वा – "भवतोः चिन्ता मास्तु। भवतोः पुत्रं सकुशलं प्रत्यानेष्यामि अहम्" इति उक्त्वा स्वयं कूपस्य अन्तः उत्पतितवान्।

कूपस्य अन्तः जले सः अधोधः गतवान्। अन्ते तेन भूमिः प्राप्ता। सः तत्र सर्वत्र दृष्टिं प्रसारयन् हस्तेन स्पृशन् परीक्षितवान्। वामतः एकत्र बिलसदृशं द्वारं दृष्टवान् सः। जागरूकतया तस्य अन्तः गत्वा दक्षिणतः परिवृत्य गतवान् सः। तदा तस्य पुरतः विशालौ द्वारकवाटौ दृष्टौ। स्पर्शमात्रेण द्वारम् उद्घाटितम् अभवत्। सः साक्षात् अग्रे गतवान्।

तत्र परमरमणीयं किञ्चन उद्यानम् आसीत्। उद्यानस्य मध्ये सौन्दर्येण राजमानम् एकं विशालं भवनम् आसीत्।। तत् भवनं प्रविष्टवान् धीरसिंहः।

भवनस्य अन्तः स्थिताः दीपाः विचित्रं प्रकाशं प्रसारयन्तः आसन्। भवनस्य मध्यभागे चन्द्रशिलामये आसने उपविश्य काचित् तरुणी वीणां वादयन्ती मधुरेण स्वरेण गायन्ती आसीत्। तस्याः अभिमुखम् अन्यस्मिन् उन्नतासने उपविश्य तन्मयभावेन सङ्गीतं शृण्वन् आसीत् कश्चन तरुणः।

धीरसिंहस्य प्रवेशकारणतः सङ्गीतं स्थगितम्। वीणावादनम् अपि स्थगितम्। युवकः सचेतनतां प्राप्तवान् इव धीरसिंहम् आश्चर्येण पश्यति। 'वृद्धदम्पत्योः पुत्रः गुणशेखरः एषः एव' इति तर्कितवान् धीरसिंहः।

"गुणशेखर! भवतः मातापितरौ भवन्तम् अपश्यन्तौ अन्नपानं परित्यज्य विलपन्तौ

स्तः। भवान् तु अत्र सङ्गीतं शृण्वन् सुन्दर्याः सहवासे सन्तोषेण अस्ति! किम् एतत् उचितम्? किम् एतत् न्याय्यम्?'' इति पृच्छन् धीरसिंहः गुणशेखरस्य समीपं गतवान्। गुणशेखरः तु लज्जया शिरः अवनमय्य स्थितः आसीत्। तस्य मुखे उन्मादचिह्नानि न दृश्यन्ते स्म।



धीरसिंहः तां सुन्दरीं पश्यन् उक्तवान् – ''सुन्दरि! भवती का इति न जानामि अहम्। दर्शनेन ज्ञायते यत् भवती सत्स्वभावयुता इति। शक्तेः, सामर्थ्यस्य, सौन्दर्यस्य च उपयोगः परोपकारार्थं स्यात् इति ज्ञानिनः वदन्ति। अत्र तु भवत्याः सौन्दर्येण व्यामुग्धः गुणशेखरः मातापितरौ विस्मृतवान् अस्ति। पुत्रम् अपश्यतोः वृद्धदम्पत्योः दुःखस्य गभीरतां ज्ञातुं न शक्नोति वा भवती? करुणामयं खलु स्त्रीहृदयम्? कृपया एतस्य मातापित्रोः विषये चिन्तयतु'' इति।

तदा सा सुन्दरी उक्तवती – ''श्रीमन्! भवता सत्यम् एव उक्तम्। किन्तु अहं भूलोकं प्रविशामि चेत् मम दिव्यशक्तिः नश्यति। अहं मानवमात्रं भवामि। यदि एषः गत्वा मातापितरौ सान्त्वयित्वा प्रत्यागच्छेत् तर्हि न तत्र आक्षेपः मम। इतः परम् अपि एवम् एव भवितुम् अर्हति'' इति।

तस्याः अनुमतिं प्राप्य धीरसिंहः गुणशेखरेण सह यथा आगतं तथैव प्रतिगत्य कूपतः उपरि आगतवान्।

अकस्मात् कूपे प्रत्यक्षीभूतौ तौ दृष्ट्वा जनाः आनन्देन आश्चर्येण च उद्गारं प्रकटितवन्तः। पुत्रस्य दर्शनम् इतः परं न भविष्यति इति भावितवतोः वृद्धदम्पत्योः हर्षः तु सीमातीतः। तौ धीरसिंहस्य धैर्यं, साहसं, परोपकारबुद्धिं च पुनः पुनः प्रशंसन्तौ प्रीत्या आशिषा अनुगृहीतवन्तौ।

प्रवृत्तं सर्वं निवेद्य वृद्धदम्पत्योः इतरेषां च अनुमतिं प्राप्य ततः अग्रे गतवान् धीरसिंहः। दिनत्रयस्य प्रयाणस्य अनन्तरं सः अन्यत् नगरं दृष्टवान्। सः नगरं प्रविश्य अभिमुखम् आगतं कञ्चन वृद्धं पृष्टवान् – ''भवान् सुगन्धजलतटाकं जानाति वा?'' इति।

''तद्विषये मया श्रुतम्। तत्र गतः कोऽपि



अद्यावधि न प्रत्यागतः। तत्र गमनं प्राणत्यागः च उभयम् अपि समानम्'' इति उक्तवान् सः वृद्धः।

''केन मार्गेण तत्र गन्तव्यम् इति सूचयतु कृपया'' इति प्रार्थितवान् धीरसिंहः।

''मरणस्य मार्गं प्रदर्शयन् पापं सम्पादयितुं न इच्छामि अहम्'' इति उक्तवान् सः वृद्धः।

तथापि धीरसिंहेन आग्रहेण यदा पृष्टं तदा सः वृद्धः – ''एतस्य नगरस्य दक्षिणद्वारम् अतिक्रम्य दशयोजनदूरं गतं चेत् अग्रे मार्गद्वयं दृश्यते। भवान् वामतः स्थितं मार्गम् अनुसरतु। अग्रे गमनेन भवान् कञ्चन पर्वतं द्रक्ष्यति। पर्वतस्य अपरस्मिन् पार्श्वे विरजापुरम् अस्ति। तस्य नगरस्य मध्यभागे निवसतः राज्ञः आधीन्ये स च मायातटाकः अस्ति इति श्रूयते। मणिमाणिक्येषु तस्य राज्ञः व्यामोहः इति श्रुतं मया। अतः तादृशानि उपायनानि दत्त्वा तं सन्तोषयति चेत् भवतः कार्यं कदाचित् सिध्येत्। कार्यं न सिद्धं चेत् मरणं तु निश्चितम्। अतः विचिन्त्य पदं स्थापयतु। देवः भवन्तम् साफल्येन अनुगृहणातु'' इति उक्त्वा धीरसिंहम् आशिषा अनुगृहीतवान्।

धीरसिंहः वृद्धेन यथा सूचितं तथा गच्छन् विरजापुरं प्राप्तवान्। मार्गे तेन अनेकाः आपदः सम्मुखीकृताः। तथापि धैर्यच्युतिम् अप्राप्नुवन् सः तत् नगरं प्राप्य महाराजं दृष्ट्वा रत्नम् एकम् उपायनरूपेण दत्तवान्। महाराजः तत् स्वीकृत्य हस्तसङ्केतेन एव धीरसिंहम् – 'इतः गन्तुम् अर्हति भवान्' इति सूचितवान्।

एतदनन्तरं षड् दिनानि अपि एवम् एव गतानि। अन्ते धीरसिंहस्य सहनया उपायनेन च सन्तुष्टः राजा उक्तवान् – ''प्रतिदिनम् अपि एकैकं रत्नं यच्छन् अस्ति खलु भवान्? प्रतिफलरूपेण मत्तः किम् इच्छति भवान्? वदतु तावत्'' इति।

''प्रार्थितं दीयते इति वचनं दत्तं चेत् अपेक्षां प्रकटयामि'' इति उक्तवान् धीरसिंहः।

''अपेक्षां निस्सन्देहं प्रकटयतु। सा अपेक्षा पूरिता भविष्यति एव'' इति आश्वासनं दत्तवान् राजा।

''तर्हि अहं मायामयं सुगन्धजलतडागं

द्रष्टुम् इच्छामि। एतदर्थम् अनुमतिः दातव्या" इति निवेदितवान् धीरसिंहः।

एतत् श्रुत्वा क्षणकालं स्तब्धः राजा आत्मानं समाश्वास्य उक्तवान् – "मायातडागस्य दर्शने भवन्तं ये प्रेरितवन्तः ते वस्तुतः अपि भवतः शत्रवः एव। यतः तत्र गत्वा मायया बद्धः कोऽपि अद्यावधि न प्रत्यागतः। अतः एषा अपेक्षा मास्तु भवतः" इति।

किन्तु धीरसिंहः मायातडागदर्शनविषये अविचलः आसीत्। अतः अनन्यगतिकः राजा भटौ आहूय धीरसिंहं तडागपर्यन्तं प्रापयितुम् आज्ञां कृतवान्।

नगरस्य दक्षिणदिशि महतः द्वारस्य पार्श्वे चत्वारः भटाः खड्गं गृहीत्वा स्थितवन्तः आसन्। तेषां पार्श्वे फलके लिखितम् आसीत् यत् जीवितुम् इच्छन् कोऽपि अन्तः न प्रविशेत् इति।

भटाः द्वारम् उद्घाटितवन्तः। धीरसिंहः अन्तः गतवान्। तत्समनन्तरम् एव द्वारं स्वयं पिहितम् अभवत्।

धीरसिंहः द्वित्राणि पदानि अग्रे गत्वा परिवृत्य दृष्टवान्। तत्र तेन द्वारं वा भित्तिः वा न दृष्टम् एव। सर्वत्र विशालम् अङ्गणं दृश्यते। तावता कश्चन जटाधारी वृद्धः धीरसिंहस्य पुरतः प्रत्यक्षीभूय – "स्वागतं भवतः। अत्र आगतं तटाके स्नापयामि अहम्। एषा मम वृत्तिः" इति उक्तवान्। धीरसिंहः तम् अनुसृतवान्।

तावता विशालं भवनं प्रत्यक्षं जातम्।





तत्र सर्वत्र अन्धकारः प्रसृतः। किं प्रवर्तते इति ज्ञातुम् इच्छन् धीरसिंहः परितः पश्यति। इदानीं तत्र न भवनं, न सुगन्धजलं, न वा तडागः। सः अङ्गणे तृणानाम् उपरि स्थितः अस्ति।

आश्चर्यम् अनुभवन् धीरसिंहः अग्रे प्रस्थितवान्। अन्धकारः कथं कदा अपगतः इति न ज्ञातवान् सः। इदानीं तस्य पुरतः उन्नतः कश्चन मण्डपः दृश्यते स्म। मण्डपं परितः चन्द्रशिलानिर्मिताः विग्रहाः आसन्। मण्डपात् अनतिदूरे शिलायाः उपरि एकं धनुः, बाणत्रययुतं तूणीरं च दृश्यते स्म।

धीरसिंहः मण्डपस्य समीपं गतवान्। मण्डपमध्ये एकं सुवर्णमयं पञ्जरम् आसीत्। पञ्जरे सुन्दरः शुकः आसीत्। मण्डपपार्श्वे भित्तौ शिलाफलके एवं लिखितम् आसीत् – "पञ्चशतवर्षेभ्यः पूर्वम् अमरकीर्तिः नाम राजा मृगयार्थम् एतं प्रदेशम् आगतवान्। अत्र तेन कश्चन अपूर्वः जीवमणिः प्राप्तः। स्वस्य अनन्तरं स्वसदृशेन समर्थेन स च मणिः प्राप्तव्यः इति उद्देशेन सः स्वमायाशक्त्या सुगन्धजलतडागम् एतं परिसरं च निर्माय मणिं सुरक्षितं स्थापितवान्। शिलायाः उपरि स्थिते धनुषि बाणं संयोज्य प्रयत्नत्रयाभ्यन्तरे यः पञ्जरस्थस्य शुकस्य वामनेत्रम् अपनयति सः मायां विजित्य जीवमणिं प्राप्स्यति। प्रयत्ने असफलः च शिलाविग्रहरूपं प्राप्स्यति" इति।

तस्य मध्ये सुगन्धप्रसारकः तडागः आसीत्। तं प्रदर्शयन् सः विचित्रवृद्धः उक्तवान् – "तडागे अवतीर्य मध्यभागं प्राप्नोतु। अहं भवन्तम् अनुसरामि" इति।

धीरसिंहः तडागं प्रविष्टवान्। सः विचित्रः पुरुषः धीरसिंहस्य उपरि कलशेन त्रिवारं जलं पातितवान्। ततः अदृश्यः अभवत् च। तेन पातितं जलं क्षणे क्षणे वर्धमानं सत् धीरसिंहस्य कण्ठपर्यन्तम् आगतम्। धीरसिंहः आत्मनः रक्षणार्थम् उपरि दृष्टिं प्रसारितवान्। तत्र छदिप्रदेशे शृङ्खला काचित् आसीत्। धीरसिंहः झटिति जले एकवारं निमज्ज्य जलं ताडयन् उपरि उत्प्लुत्य तां शृङ्खलां गृहीतवान्। तत्क्षणे तत्र कश्चन महान् शब्दः श्रुतः। तेनैव सह



धीरसिंहः झटिति शिलायाः उपरि स्थितं धनुः उन्नीय तत्र बाणं योजयित्वा शुकस्य वामनेत्रं लक्ष्यीकृत्य प्रयुक्तवान्। किन्तु स च प्रयत्नः व्यर्थः जातः। तावता तस्य जानुपर्यन्तः भागः शिलारूपतां प्राप्तवान् आसीत्। सः द्वितीयवारं बाणप्रयोगं कृतवान्। एषः अपि प्रयत्नः व्यर्थः जातः। कटिपर्यन्तः भागः शिलामयः जातः। तदा पञ्जरस्थः शुकः उपहसन् अवदत् – "धीरसिंह! लक्ष्यभेदनं कर्तुं न शक्नोति भवान्। किमर्थं वृथा प्रयत्नः?" इति।

धीरसिंहः धैर्यच्युतः न जातः। सः शुकस्य चलनवलनं जागरूकतया परिशीलयन् तृतीयं बाणं प्रयुक्तवान्। बाणः लक्ष्ये सम्यक् लग्नः। क्षणमात्रेण तत्र अशनिपातः जातः इव। मेघगर्जनं श्रुतम्। तडित् दृष्टा। भूमिः कम्पिता जाता।

एतत्सर्वम् आश्चर्येण पश्यन् धीरसिंहः तटस्थरूपेण स्थितवान्। मण्डप-पञ्जर-शुकादयः अदृश्यतां गताः आसन्। समीपे एव जीवमणिः प्रकाशते स्म। शिलारूपं गतः तदीयः कटिपर्यन्तः भागः पूर्वस्थितिं प्राप्तवान् आसीत्।

धीरसिंहः जीवमणिं हस्तेन स्वीकृत्य सर्वेषां विग्रहाणाम् उपरि स्थापयन् गतवान्। विग्रहाः सर्वे राजकुमाररूपेण परिवृत्ताः। सर्वे राजकुमाराः धीरसिंहस्य उपकारं कृतज्ञतापूर्वकं स्मरन्तः स्वदेशं गतवन्तः।

धीरसिंहः कौशाम्बीं प्रत्यागत्य तडागस्य उत्पत्तिकारणं पूर्वापरं च सुलोचनां निवेदितवान्। आत्मनः अनुभवान् अपि विस्तरेण निवेदितवान्।

तदा राजकुमारी तृप्तिं प्रकटयन्ती – "भवता उक्तं सत्यम् एव। मायाबन्धात् विमुक्ताः राजकुमाराः भवतः गुणगानं यत् कुर्वन्ति तदेव अत्र प्रमाणम्। श्वः पुनरपि भवान् मां पश्यतु। अन्तिमं पञ्चमं च प्रश्नं श्वः श्रावयिष्यामि" इति उक्त्वा धीरसिंहं विश्रान्तिगृहं प्रति प्रेषितवती।

(अग्रिमसञ्चिकायां समाप्ता भविष्यति।)





# पञ्च प्रश्नाः

## (५)

चत्वारि विजयसोपानानि आरुह्य धीरसिंहः पञ्चमं प्रश्नं ज्ञातुम् अन्तःपुरं गतवान्। आगतं तम् उक्तवती राजकुमारी सुलोचना – "राजकुमार! इतः ईशान्यदिशि शब्दभेदी नाम पर्वतः अस्ति। तस्य पर्वतस्य किं वैशिष्ट्यम्? पर्वतस्य अपरस्मिन् पार्श्वे स्थितस्य नगरस्य नाम किम्? एतत्सर्वं ज्ञात्वा आगत्य वक्तव्यं भवता" इति।

धीरसिंहः मासत्रयस्य अवधिं सम्प्रार्थ्य अश्वम् आरुह्य ईशान्यदिशि प्रयाणम् आरब्धवान्। नदीः, पर्वतान् च अतिक्रम्य गच्छन् सः अष्टमे दिने एकं गहनारण्यं प्राप्तवान्।

सँ च मध्याह्नकालः आसीत्। अतः अश्वात् अवतीर्य सः अश्वं वृक्षे बद्ध्वा वृक्षच्छायायाम् उपविष्टवान्।

तदा अकस्मात् पक्षिणां कोलाहलः श्रुतः। पशवः आक्रोशनैः वने व्याकुलताम् उत्पादयन्तः इतस्ततः धावन्ति स्म। दूरे श्रूयमाणः ध्वनिः क्रमशः समीपम् आगतः।

धीरसिंहः झटिति वृक्षम् आरुह्य यतः ध्वनिः श्रूयते तस्यां दृष्टिं प्रसारितवान्। तत्रत्यस्य दृश्यस्य दर्शनेन सः क्षणकालं स्तब्धः। हरिणाः, गजाः, व्याघ्राः, शृगालाः, वृकाः, भल्लूकाः इत्यादयः वन्यमृगाः भयात् आक्रन्दनं कुर्वन्तः धावन्ति। दीर्घैः पादैः,



मृगस्य उदरविदारणम् अकरोत्। तदा सः मृगः दिशः बधिरीकुर्वन् आक्रन्दनपूर्वकं प्राणान् परित्यज्य अधः अपतत्। धीरसिंहः तस्य दंष्ट्राः नखान् च कर्तयित्वा स्वसमीपे स्थापितवान्। अश्वम् आरुह्य प्रयाणम् अनुवर्तितवान् च।

अनन्तरदिने सायङ्काले सः किञ्चन नगरं प्राप्तवान्। तच्च नगरं परमरमणीयम् आसीत्। उन्नतैः प्रासादैः, विशालैः उद्यानैः च नितरां शोभते स्म तत्। किन्तु नगरे मनुष्यसञ्चारः सर्वथा न दृश्यते स्म। आश्चर्यम् अनुभवन् धीरसिंहः राजभवनम् उद्दिश्य गतवान्। तावता कश्चन भटः तस्य समीपम् आगत्य – "महाराजः भवन्तम् अन्तः आगन्तुं सूचितवान् अस्ति" इति उक्त्वा तम् अन्तः नीतवान्।

अश्वं द्वारसमीपे परित्यज्य धीरसिंहः अन्तः गतवान्। तत्र राजा चिन्ताक्रान्तः सन् उपविष्टवान् आसीत्। सः धीरसिंहं दृष्ट्वा उक्तवान्– "भोः, भवान् कश्चन परदेशीयः। अतः मम राज्यस्य दारुणां परिस्थितिं न जानाति भवान्। मम राज्यं सम्पदा पूर्णम् अस्ति। किन्तु किं तेन? प्रजाः सुखशान्तिहीनाः सन्ति। अत्र कारणं समीपस्थे अरण्ये स्थितः विलक्षणः मृगः। सः तदा तदा नगरस्य उपरि आक्रमणं करोति। सम्मुखम् आगतं मानवं पशुं वा निर्दयं मारयन् कांश्चन खादति। तस्य बन्धनं मारणं वा

दीर्घेण पुच्छेन, क्रूराभ्यां नेत्राभ्यां च युक्तः विलक्षणः घोरः कश्चन मृगः एतं वन्यमृगसमूहम् अनुधावति स्म।

द्वित्राणां क्षणानाम् अनन्तरं वन्यमृगाः धीरससिंहेन आरूढं वृक्षम् अतिक्रम्य अग्रे गतवन्तः। सः विलक्षणः मृगः वृक्षम् आरुह्य स्थितं धीरसिंहम् अपश्यत् एव। झटिति धीरसिंहस्य उपरि आक्रमणम् अकरोत्। धीरसिंहः खड्गम् आकृष्य तेन तं मृगं बलेन ताडितवान्। एतावता अन्यः मृगः चेत् मृतः भवेत्, किन्तु एषः किञ्चिद्दूरे अपतत्, तावदेव।

धीरसिंहः वृक्षात् अधः आगत्य विलक्षणमृगेण सह घोरं युद्धं कृतवान्। एतस्मिन् युद्धे धीरसिंहस्य खड्गः तस्य

सर्वथा असाध्यम्। अतः भीताः जनाः राजधानीं परित्यज्य गतवन्तः। केचन स्थिताः अपि गृहात् बहिः न आगच्छन्ति। भवता दृष्टं खलु? अस्माकं नगरम् इदानीं मरुभूमिसदृशं जातम्" इति।

"भवतः नगरस्य स्थितिः दृष्टा मया। इतः परम् एतादृशी स्थितिः न भविष्यति। यतः सः विलक्षणः मृगः मया हृधः एव मारितः" इति वदन् धीरसिंहः तस्य मृगस्य नखान् दंष्ट्राः च प्रदर्शितवान्।

राजा तत्सर्वं दृष्ट्वा अत्याश्चर्यं प्रकटयन् – "हा हन्त! इदानीं निरातङ्कं श्वसिमि अहम्। मम प्रजानां प्राणाः रक्षिताः भवता। मृगमारणवार्ताम् अद्यैव डिण्डिमघोषपूर्वकं प्रसार्य प्रजाः प्रत्यानेष्यामि। भवता कृतः उपकारः आजीवं स्मरणयोग्यः। अस्य प्रत्युपकाररूपेण किं साहाय्यं करोमि अहम्? निस्सङ्कोचं प्रार्थयतु" इति उक्तवान्।

"अहं शब्दभेदिपर्वतस्य रहस्यं ज्ञातुम् इच्छन् आगतवान् अस्मि। तत्पर्वतं प्रति गमनमार्गं भवान् जानाति चेत् वदतु। तावता अलम्" इति उक्तवान् धीरसिंहः।

"स च पर्वतः इतः दशयोजनदूरे अस्ति। पर्वतपार्श्वे एव शब्दभेदिनगरम् अपि अस्ति। दिनत्रयं यावत् अत्र स्थित्वा अस्माकम् आतिथ्यं स्वीकृत्य इतः गन्तुम् अर्हति भवान्" इति उक्तवान् राजा।

धीरसिंहः आग्रहपूर्वकम् उक्तं महाराजस्य



एतत् वचनम् अङ्गीकृत्य दिनत्रयं तस्मिन् नगरे स्थितवान्। अनन्तरं महाराजेन प्रेषिताभ्यां भटाभ्यां सह ततः प्रस्थितवान्।

ते दीर्घप्रयाणानन्तरं शब्दभेदिनगरस्य समीपं गतवन्तः। नगरस्य उत्तरदिशि उन्नतः पर्वतः दृश्यते। स च पर्वतः गहनैः वृक्षसमूहैः आवृतः आसीत्। पर्वतविषये वार्तां सङ्ग्रहीतुम् इच्छन् धीरसिंहः नगरे कस्याञ्चित् धर्मशालायां स्थितवान्। तत्र सः बहूनां परिचयं प्राप्तवान्। केषाञ्चित् स्नेहम् अपि सम्पादितवान्। वीरवर्मा नाम युवकः तु तस्य आत्मीयः जातः।

कदाचित् धीरसिंहः राजमार्गेण गच्छन् आसीत्। तदा 'आगच्छतु, आगच्छतु' इति कुतश्चित् आह्वानं श्रुतम्। तावता आपणे



उपविष्टः कश्चन तरुणः झटिति उत्थाय उन्मत्तः इव पर्वतस्य दिशि धावितवान्। तस्य ग्रहणार्थं धीरसिंहः प्रयत्नं कृतवान्। किन्तु तावता सः तरुणः धनुषा मुक्तः बाणः इव वेगेन गच्छन् अदृश्यतां गतः आसीत्।

धीरसिंहः अत्याश्चर्येण वीरवर्माणं पृष्टवान् – "मित्र! किम् एतत्? तत् आह्वानं कस्य? तरुणः किमर्थं तथा धावितवान्? कोऽपि तं धावनात् निवारयितुं किमर्थं प्रयत्नं न कृतवान्?" इति।

"तच्च आह्वानं शब्दभेदिपर्वतात् आगतम्। यम् उद्दिश्य तत् आह्वानम् आगच्छति सः सर्वम् अपि विस्मृत्य पर्वतम् उद्दिश्य धावति। तथा गतेषु कोऽपि अद्यावधि न प्रत्यागतः। एवं गच्छतः निवारणप्रयासेन, तद्विषये दुःखप्रकटनेन च किमपि प्रयोजनं न भवति। अतः कोऽपि तादृशं न निवारयति, न वा तादृशस्य विषये दुःखम् अनुभवति" इति उक्तवान् वीरवर्मा।

"तथा आह्वानं किमर्थम् आगच्छति?" इति पृष्टवान् धीरसिंहः।

"तत् रहस्यं तु कोऽपि न जानाति" इति उक्तवान् वीरवर्मा।

"तथा धावन्तम् अनुसरामः चेत् वस्तुस्थितिः न ज्ञायेत वा?" इति पुनः पृष्टवान् धीरसिंहः।

"तथा कर्तुं कस्यपि धैर्यं नास्ति खलु?" इति उत्तरं दत्तवान् वीरवर्मा।

धीरसिंहः पुनः किमपि न पृष्टवान्। अनन्तरं तौ धर्मशालां गतवन्तौ।

ततः अष्टमे दिने धीरसिंहः वीरवर्मणा सह वार्तालापं कुर्वन् उद्याने उपविष्टवान् आसीत्। तावता पर्वतात् आह्वानम् आगतम्– "आगच्छतु भोः, शीघ्रम् आगच्छतु" इति।

अनन्तरक्षणे धीरसिंहस्य पुरतः उपविष्टः वीरवर्मा उन्मत्तः इव उत्थाय पर्वतम् उद्दिश्य धावनम् आरब्धवान्।

"तिष्ठतु तावत् वीरवर्मन्! " इति वदन् धीरसिंहः धावन् तम् अनुसृतवान्। वीरवर्मा तु धीरसिंहस्य वचनम् अशृण्वन् इव वेगेन धावति। धीरसिंहः वेगं वर्धयति चेत् वीरवर्मणः वेगः अपि वर्धते स्म। अल्पे एव



काले तौ पर्वतम् आरोढुम् आरब्धवन्तौ।

अग्रे काचित् महाशिला मार्गे दृष्टा। वीरवर्मा लीलया तां शिलाम् अतिक्रान्तवान्। धीरसिंहः अपि महता प्रयासेन ताम् अतिक्रम्य गतवान्। पुनः तृणमये अङ्गणे तयोः धावनम् अनुवृत्तम्। तदा अकस्मात् महता शब्देन सह भूमिः द्विधा विभक्ता जाता। वीरवर्मा एवं विभागात् उत्पन्ने खाते पतितवान्। तदनन्तरं भूमिः यथापूर्वं जाता।

धीरसिंहः दुःखेन आश्चर्येण च एतत्सर्वं पश्यन् सर्वत्र जागरूकतया दृष्टिं प्रसारयन् पर्वतशिखरम् उद्दिश्य प्रस्थितवान्। अल्पे एव काले सोढुम् अशक्येन तापेन सः पीडितः अभवत्। तथापि सः अग्रे गतवान्। तावता सः अग्निज्वालायुक्तां नदीं दृष्टवान्। एतस्याः नद्याः अतिक्रमणं कथम्, इति चिन्तयन् धीरसिंहः कस्याश्चित् शिलायाः उपरि उपविष्टवान्। तत्र तापबाधा तावत् न आसीत्। अतः सः शिलाम् आलम्ब्य उपविशन् पादौ प्रसारितवान्। तत्रैव निद्रां प्राप्तवान् च। निद्रायां सः कञ्चन स्वप्नं दृष्टवान्।

मनुष्यमुखः सिंहकायः कश्चन विचित्राकारः तस्य स्वप्ने आगत्य— "धीरसिंह! भवतः मित्रम् अहं वीरवर्मा अस्मि। स्वप्नलोके मृगमनुष्यः जातः अस्मि। भवतः धैर्यं साहसं च अपूर्वम्। इतः परं एषः पर्वतः स्वप्नरूपं मुखं न उद्घाटयति। अग्निनद्याः अपरस्मिन् तीरे अग्निनाभः नाम राक्षसः वज्रपर्वतं रक्षन् अस्ति। अग्निनद्यां काचित् नौका दृश्यते। ताम् आरुह्य अग्रे गच्छन् नदीम् अतिक्रम्य धैर्येण तम् अग्निनाभं राक्षसं मारयतु। एतत् सूर्योदयात् पूर्वम् एव करणीयम्। भवतः कार्ये जयः तु निश्चितः" इति वदन् अग्रिमपादम् उन्नीय शुभाशंसनम् अकरोत्।

उषःकालसमये धीरसिंहः जागरणं प्राप्तवान्। सः झटिति उत्थाय अग्निनदीसमीपं गतवान्। नद्याः तीरे एका नौका आसीत्। सः अग्निज्वालाम् अपरिगणयन् धैर्येण उत्प्लुत्य नौकायाम् उपविष्टवान्। ततः विना विघ्नम् अपरं तीरं प्राप्तवान् सः।



प्रकाशमानं स्थलं न भूमिः, अपि तु कासारः इति धीरसिंहेन परीक्षणात् ज्ञातम्। कासारदर्शनेन धीरसिंहः पिपासां स्मृतवान्। स अग्रे गत्वा अञ्जलिना जलं पीतवान्। तावता तदीयं हस्तद्वयं रजतमयं जातम् आसीत्। चकितः धीरसिंहः जलम् अधः पातयित्वा अग्रे गतवान्। तत्र तेन सुवर्णद्रवमयः तटाकः दृष्टः। तत्र सुवर्णकमलानि विकसितानि आसन्। अपरत्र सुवर्णमयी काचित् नौका अपि आसीत्। तां नौकाम् आरुह्य तटाकम् अतिक्रम्य धीरसिंहः अग्रे गच्छन् पर्वतशिखरं प्राप्तवान्।

तत्र मणयः, रत्नानि, वज्राणि च शिलाः इव राशिरूपेण पतितानि आसन्। तत्कारणतः तच्च पर्वतशिखरम् इन्द्रधनुः इव राजते स्म। "षट् वज्राणि केवलं स्वीकरोतु। तेषु अहं निवसामि। एतेन भवतः हितं भविष्यति" इति अशरीरवाणी श्रुता। धीरसिंहः तद्वचनानुगुणं षट् वज्राणि स्वीकृत्य अग्रे गतवन्।

अनतिदूरे निर्मलजलयुता नदी प्रवहन्ती धीरसिंहेन दृष्टा। धीरसिंहः उत्साहेन अग्रे गत्वा नदीजलेन हस्तौ पादौ च प्रक्षालितवान्। एतेन रजतत्वम् आप्तवान् तस्य हस्तः यथापूर्वम् अभवत्। किन्तु नखाः रजतमयाः एव आसन्।

एतावता काचित् नौका प्रवाहेण सह तस्य समीपम् आगता। तस्याः आधारेण सः नद्याः

अत्रान्तरे भयङ्करः कश्चन राक्षसः प्रत्यक्षीभूय– "मम अनुमतिं विना एतस्यां भूमौ पदं स्थापितवान् सः उद्धतः कः?" इति कोपेन वदन् धीरसिंहसमीपम् आगतवान्। विद्युद्वेगेन धीरसिंहस्य खड्गः कार्यम् अकरोत्। राक्षसस्य मुण्डं भूमौ अपतत्।

अन्यक्षणे सः राक्षसः दिव्यपुरुषरूपं प्राप्य– "धीरसिंह! मित्राणि मया यत् वञ्चितानि ततः मया स्वप्नलोकस्य रक्षककार्यं क्रियमाणम् आसीत्। भवान् मां शापात् मोचितवान्। पर्वतः अपि शान्तः जातः। अहम् आगच्छामि तावत्" इति उक्त्वा आकाशमार्गेण गतवान्।

धीरसिंहः सन्तोषेण अग्रे गतवन्। स च प्रदेशः रजतमयः इव भासते स्म। एवं



अपरं तीरं प्राप्तवान्। ततः एकम् अरण्यम् अतिक्रम्य कञ्चन ग्रामं प्राप्तवान् सः। तस्य सम्मुखम् आगतः कश्चन ग्रामीणः भक्त्या धीरसिंहं नमस्कृतवान्।

"मां किमर्थम् एवं नमस्करोति? एषः ग्रामः कस्य देशस्य?" इति तं ग्रामीणं पृष्टवान् धीरसिंहः।

"नेपालदेशस्य सीमाप्रदेशे अस्ति एषः ग्रामः। भवान् खलु अस्माकं युवराजः! अतः एव नमस्करोमि" इति उक्तवान् सः ग्रामीणः।

धीरसिंहः सन्तोषेण कानिचन पदानि अग्रे गतवान्। तावता तदीयः अश्वः तत्र आगतः। तम् आरुह्य कौशाम्बीनगरं गत्वा सुलोचनां दृष्टवान् धीरसिंहः।

तत्समये आस्थानपण्डितः सुधाकराचार्यः अपि तत्रैव आसीत्। तौ धीरसिंहम् आदरेण स्वागतीकृत्य सत्कृतवन्तौ।

धीरसिंहः शब्दभेदिपर्वते दृष्टानि वैचित्र्याणि विस्तरेण निवेदितवान्। तस्मात् पर्वतात् आनीतानि वज्राणि, रजतमयरूपेण परिवृत्तान् नखान् च प्रदर्शितवान् सः।

एतत्सर्वं श्रुत्वा सुधाकराचार्यः– "धीरसिंह! अस्मिन् लोके भवता कर्तुम् अशक्यं कार्यं सर्वथा नास्ति। यतः भवतः धैर्यं साहसबुद्धिः च अनुपमम्। भवतः परोपकारबुद्धिः अपि नितरां श्लाघ्या एव" इति श्लाघनं कृत्वा सुलोचनां पश्यन् उक्तवान्– "वत्से! भवत्या पृष्टानां पञ्चानाम् अपि प्रश्नानां योग्यम् उत्तरं ज्ञात्वा आगतवान् अस्ति धीरसिंहः। भवत्या अभिलषितः धीरोदात्तः असमसाहसी तरुणः अस्ति एषः। नेपालराजकुमारस्य एतस्य परिणयः भवत्या अनुमतः खलु?" इति। सुलोचना मन्दहासं प्रकटयन्ती अङ्गीकार-पूर्वकं शिरः चालितवती।

अनन्तरं शुभे मुहूर्ते सुलोचना-धीरसिंहयोः विवाहः सवैभवं प्रवृत्तः। धीरसिंहः प्रजाः पुत्रान् इव प्रीत्या पालयन् दीर्घकालं यावत् राज्यं शासितवान्। (समाप्ता)





# पिता पुत्रः च

भगवान् श्रीमन्नारायणः शेषतल्पे शयानः आसीत्। महालक्ष्मीः तस्य पार्श्वे उपविश्य पतिसेवायां निरता आसीत्। नारायणस्य मुखे यथापूर्वं निर्लिप्तता। तदा लक्ष्मीः मन्दस्वरेण पतिं पृष्टवती– "श्रीमन्! मम कश्चन सन्देहः अस्ति, निवेदयामि वा?" इति।

नारायणः तु उत्तरं किमपि अयच्छन् पत्नीं कटाक्षेण पश्यन् मन्दहासं प्रकटितवान्। एतत् सम्मतिलक्षणं मन्यमाना लक्ष्मीः पृष्टवती– "लक्षशः जनाः भवन्तं पूजयन्तः अपेक्षाः प्रकटयन्ति। किन्तु तेषां सर्वेषाम् अपेक्षां न पूरयति भवान्। तेषां परितापं दृष्टवत्याः मम महान् खेदः। एवम् उपेक्षा किमर्थम्?" इति।

नारायणः लक्ष्मीं पश्यन् मन्दहासपूर्वकम् उक्तवान्– "पात्रापात्रताम् अपरिशील्य सर्वे अनुगृहीताः चेत् ते एव सुखेन वञ्चिताः भवेयुः। ते परिणामविषये अचिन्तयन्तः स्वेच्छया अपेक्षां प्रकटयन्ति। तेषां योगक्षेमौ मया एव खलु वोढव्यौ? अतः अहं विविच्य अनुग्रहं करोमि। भवती तु लोकवत्सला। तथापि अनुग्रहसमये पात्रत्वं चिन्तयति चेत् वरम्" इति।

लक्ष्मीदेवी मौनं स्थितवती। तस्याः मौनेन एव नारायणः ज्ञातवान् यत् मम वचनैः एषा न तृप्ता इति। अतः सः पुनः उक्तवान्– "मम वचनस्य समर्थकम् एकम् उदाहरणं श्रावयामि, शृणोतु। कस्मिंश्चित् ग्रामे सूर्यः



नाम कश्चित् अस्ति। सन्तानरहितः सः सपत्नीकः मां पूजयन् पुत्रं प्रार्थितवान्। अहं तं वरेण अनुगृहीतवान्। तस्य पुत्रः जातः। पुत्रस्य नाम सत्यनारायणः इति निश्चितम्। एतन्मध्ये सूर्यस्य पत्नी अकस्मात् दिवङ्गता। पुत्रं योग्यया रीत्या पोषयितुं न शक्तवान् सः। पुत्रः बुद्धिविहीनः सन् वर्धमानः अस्ति।

पितापुत्रयोः स्वभावे महत् अन्तरं दृश्यते। एषः मम पुत्रः भवितुम् अनर्हः इति पिता भावयति। 'मम शत्रुः एषः' इति पुत्रः पितुः विषये चिन्तयति। उभयोः अपि इदानीं मनःसमाधानं नास्ति। पश्यतु, तेन प्रार्थितः वरः दत्तः मया। तथापि प्रयोजनं किमपि न सिद्धम्'' इति।

''अन्यः वरः दातव्यः। तौ सुखेन यथा निवसेतां तथा करणीयम्। वरदानं तु शक्यं खलु?'' इति उक्तवती लक्ष्मीः।

लक्ष्म्याः अपेक्षां तिरस्कर्तुम् अनिच्छन् विष्णुः– ''अस्तु तावत्। अन्यं वरं ददामि'' इति उक्तवान्।

* * * *

कदाचित् सत्यनारायणः शालार्थं प्रस्थितः शालाम् अगत्वा वाटिकायां किञ्चित् समयं यापयित्वा बुभुक्षाकारणतः शीघ्रम् एव गृहं प्रत्यागतवान्।

''एतावच्छीघ्रं किमर्थम् आगतवान्?'' इति असमाधानेन पृष्टवान् पिता सूर्यः।

''कक्ष्यायां मम उदरवेदना आरब्धा। मम कष्टं दृष्ट्वा अध्यापकः मां शीघ्रम् एव गृहं प्रेषितवान्'' इति उत्तरं दत्तवान् सत्यनारायणः।

''उदरवेदना वा? उपवासेन सा अपगच्छति। अद्य पाचिका लड्डुकादिकं सज्जीकृतवती। दौर्भाग्यं नाम भवान् तत् खादितुं न अर्हति। चौर्येण खादितुं प्रयत्नं करोति चेत् भवन्तं तप्तायःशलाकया दण्डयेयम्। प्रकोष्ठे तूष्णीं शयनं करोतु'' इति उक्त्वा सूर्यः पुत्रं प्रकोष्ठस्य अन्तः प्रेषयित्वा बहिस्तात् कीलितवान्।

प्रकोष्ठात् बहिः उपविष्टः पिता चिन्तयति– 'अहो, सौभाग्यं बाल्यस्य! न कापि चिन्ता। नियतरूपेण प्रतिदिनं

शालागमनं, गृहे समीचीनं भोजनम्। पुनः स्वेच्छया विहारः। न कुटुम्बनिर्वहणभारः। न वा आयव्ययस्य चिन्ता। अहं यदि इदानीं बाल्यं प्राप्नुयाम् तर्हि सुखेन कालयापनम् अकरिष्यम्। किन्तु एतस्मिन् जन्मनि तादृशं भाग्यं कुत्र मम?" इति।

प्रकोष्ठे स्थितः पुत्रः सत्यनारायणः एवं चिन्तयति– "अहो! ज्येष्ठैः क्रियमाणाः निर्बन्धाः! कारागारतुल्या शाला, नीरसः पाठः, यमतुल्यौ अध्यापकः पिता च। जुगुप्साजनकं पठनम्! ज्येष्ठाः मां सदा तर्जयन्ति। तेषां तर्जयिता तु कोऽपि नास्ति। ते यथेष्टं भक्ष्याणि खादन्ति। यस्य खादने इच्छा भवति तत् भक्ष्यं कारयन्ति, खादन्ति च। यत्र इच्छन्ति तत्र गच्छन्ति। सर्वथा स्वातन्त्र्यं तेषाम्। अहं तादृशीम् अवस्थां कदा वा प्राप्नुयाम्? तादृशस्वातन्त्र्यप्राप्त्यर्थं मया इतोऽपि कति वर्षाणि प्रतीक्षणीयानि?" इति।

लक्ष्म्याः मनसः तृप्त्यर्थं नारायणः उभयोः अपि अपेक्षां वरदानेन पूरितवान्।

प्रकोष्ठात् बहिः स्थितः सूर्यः सत्यनारायणस्य रूपं प्राप्तवान्। सत्यनारायणः तु पितुः सूर्यस्य रूपं प्राप्तवान् अस्ति। किन्तु उभौ अपि आत्मनः रूपपरिवर्तनं सर्वथा न जानीतः।

पिता सूर्यः कार्यनिमित्तं कुत्रापि प्रस्थितवान्। परितः स्थितानि गृहाणि



उन्नतानि इव दृश्यन्ते। गृहाणि पूर्णतः द्रष्टुं शिरः उन्नेतव्यं भवति स्म। मनसः चिन्तायाः कारणतः नेत्रयोः शक्तिः नष्टा स्यात् इति आलोचितवान् सूर्यः।

मार्गे गोपालः मिलितः। तं समीपम् आह्वयन् सूर्यः पृष्टवान्– "किं भोः गोपाल! कुतः आगच्छन् अस्ति?" इति।

एतत् श्रुत्वा गोपालः नितरां कुपितः। "अये मूर्ख! कियत् धाष्ट्यं भवतः? बालः भवान् ज्येष्ठं मां नाम्ना आह्वयति खलु? तदपि मार्गे! भवतः पितरं सूचयन् सम्यक् दण्डयिष्यामि" इति कोपेन वदन् दण्डम् उन्नीय ताडनार्थम् आगतवान्।

सूर्यः भीतः सन् "अये गोपाल! किम् एतत्?" इति वदन् ततः धावितवान्। स्वस्य



धावनवेगं दृष्टवतः तस्य महदाश्चर्यम्! एषु दिनेषु वेगेन चलनम् अपि कष्टकरम् आसीत्। यतः शरीरं स्थूलं शक्तिहीनं च जातम् आसीत्। शरीरभारे एतादृशी लाघवम् कथम् आगतम् इति न जानाति सूर्यः। तस्य तु महान् सन्तोषः यत् मत्तः अपि कनिष्ठः दृढकायः गोपालः माम् अनुसर्तुं न शक्तवान् इति।

अनन्तरं सूर्यः धावनं स्थगयन्– "मया किमर्थं धावनं क्रियमाणम् अस्ति? गोपालः किमर्थं वा मां ताडयितुम् उद्युक्तः? अद्य सर्वं विचित्रं दृश्यते खलु?" इति आलोच्य उन्मत्तः इव उच्चैः हसितवान्।

तावता कश्चित् तस्य स्कन्धे स्वहस्तं स्थापयन्– "अये! अद्य शालायाम् अनुपस्थितः अत्र किं कुर्वन् अस्ति? कस्य वाटिकातः किम् अपहृत्य खादितवान्? अथवा केनापि सह क्रीडितवान् वा? का क्रीडा? कियत्पर्यन्तं प्रवृत्ता?" इति पृष्टवान्।

सूर्यः आश्चर्येण परिवृत्य दृष्टवान्। कश्चन अष्टवर्षीयः बालकः एतं दृष्ट्वा हसन् अस्ति। एतत् दृष्टवतः सूर्यस्य महान् कोपः आगतः।

"अये! मम स्कन्धे हस्तं स्थापयति खलु? कियत् औद्धत्यं भवतः? कः भवान्?" इति कोपेन पृष्टवान् सूर्यः।

"अहो! अहं कः इति न जानाति भवान्? मयि औद्धत्यम् आरोपयति खलु? श्वः शालाम् आगच्छतु। अध्यापकः सम्यक् दण्डयन् सर्वं स्मारयिष्यति" इति उक्त्वा उपहसन् ततः धावितवान् सः बालकः।

'मूर्खः अयम्। कः अध्यापकः मां किमर्थं ताडयेत्? अहं किमर्थं वा शालां गच्छेयम्?' इत्यादिकम् आलोचयन् सूर्यः धनिकस्य शिवरामस्य आपणं गत्वा – "श्रीमन्! अर्धगोणीमितः तण्डुलः, किलोमिता आढकी, पादकिलोमिता तिन्त्रिणी च आवश्यकाः। सर्वं ददातु" इति उक्तवान्।

"अवश्यं ददामि। प्रथमं धनम् अत्र स्थापयतु" इति हसन् उक्तवान् धनिकः।

'अद्यावधि शिवरामः विना वचनं वस्तूनि ददाति स्म। धनम् अनन्तरं स्वीकरोति स्म। सप्ताहानन्तरम् अपि कदाचित् धनं दत्तम्। अद्य तु वस्तुदानात् पूर्वम् एव धनं पृच्छति

खलु?' इति आलोचयन् सूर्यः धनस्वीकरणार्थं कोषे हस्तं प्रसारितवान्। तत्र धनं कथं भवेत्? तत्र तु सुधाखण्डाः, वर्णमय्यः शिलाः, बीजानि, रज्जुः, मयूरपिच्छम् इत्यादयः दृश्यन्ते! कथम् एते मम कोषे आगताः इति आश्चर्येण चिन्तयति सूर्यः।

वस्तुतः तत्समये सूर्यस्य महती बुभुक्षा आसीत्। वस्तूनां स्वीकरणानन्तरम् उपाहारमन्दिरं गत्वा किमपि खादनीयम् इति तस्य विचारः आसीत्। इदानीं तु धनाभावतः अपमाननम् एकत्र। अपरत्र उपाहारमन्दिरस्य पुरतः विविधानि खाद्यानि खादतां दर्शनेन जायमाना असूया!

एवं पश्यन् सः अकस्मात् द्वारपार्श्वे स्थापितं दर्पणं दृष्टवान्। तत्र तदीयं प्रतिबिम्बं दृश्यते स्म। दर्पणे सत्यनारायणस्य रूपं दृश्यते! 'एवं तर्हि अहं कः? सूर्यः, उत सत्यनारायणः? अहं पुत्रश्च अभिन्नौ वा? आवयोः अभेदः कथं वा शक्येत? यतः मया एव स्वयं सः प्रकोष्ठे स्थापितः। अहो आश्चर्यम्!'

सूर्यस्य स्वदृष्टिशक्तौ एव अविश्वासः। सः अवनम्य पादभागं दृष्टवान्। कोमलौ ह्रस्वौ पादौ! पादयोः न पादरक्षा! कटौ तु अर्धोरुकं दृश्यते, न तु वेष्टी। सः शिरः स्पृष्टवान्। खल्वाटता न अनुभूता तेन। शिरसि विपुलाः केशाः दृश्यन्ते। मुखे श्मश्रु न दृश्यते। उपनेत्रम् अपि मुखे नास्ति। तथापि सर्वाणि वस्तूनि स्फुटं दृश्यन्ते!

'मम रूपस्य परिवर्तनं जातम्। अहं पुत्रस्य





मा भणतु" इति तर्जनस्वरेण उक्तवान् सत्यनारायणः।

इतः पूर्वं कदापि कोपेन किमपि अनुक्तवान् मम स्वामी अद्य किमर्थम् एवं व्यवहरति इति न जानाति सा। सत्यनारायणः पितुः रूपं प्राप्तवान् अस्ति इति सा कथं वा जानीयात्?

सत्यनारायणः ततः प्रस्थाय सोपानमार्गेण अट्टम् आरोढुम् उद्युक्तः। पिता धनं कुत्र स्थापयति इति सः जानाति। किन्तु सः वेगेन आरोहणं कर्तुं न शक्तवान्। पादौ असहकारं प्रदर्शितवन्तौ। पञ्चषाणां सोपानानाम् आरोहणेन एव जानुग्रन्थौ वेदना आगता। सः तत्रैव पतितवान्। तथापि बलात् कथञ्चित् उत्थाय जानुग्रन्थेः उपरि हस्तौ स्थापयन् दीर्घं निःश्वसन् अट्टं प्राप्तवान्।

रूपं प्राप्तवान् अस्मि' इति ज्ञातवान् सूर्यः। एवं तर्हि पुत्रः इदानीं कथम् अस्ति? इति प्रश्नः मनसि उत्पन्नः। काचित् अस्पष्टा भीतिः मनसि उद्भूता।

सत्यनारायणः पित्रा प्रकोष्ठे स्थापितः आसीत् खलु? पितुः बहिर्गमनं निश्चित्य सः द्वारं पादेन निरन्तरं ताडितवान्। ताडनशब्दं श्रुत्वा पाचिका द्वारशृङ्खलाकीलनम् अपनीय द्वारम् उद्घाटितवती। तं दृष्ट्वा— "हा हन्त! भवन्तं प्रकोष्ठे स्थापयित्वा कः कीलितवान्? सत्यनारायणस्य कार्यं वा एतत्? सः एतावत् औद्धत्यं कृतवान् वा! पिञ्जरम् एव बन्धने स्थापितवान् खलु सः!" इति उद्गारं प्रकटितवती।

"अये! तूष्णीं तिष्ठतु। यथा स्फुरति तथा

'अहो श्रान्तिः! पाचिकया कृतानि भक्ष्याणि प्रथमं खादामि। तदनन्तरम् अन्यानि कार्याणि' इति आलोच्य सः पाचिकाम् आहूय भक्ष्याणि आनेतुं सूचितवान्।

पाचिका भीता सती स्थालिकायां भक्ष्याणि स्थापयित्वा आगत्य— "इदमिदानीं भक्ष्याणि खादितानि खलु भवता? एतानि पुत्रनिमित्तं स्थापितानि मया। भक्ष्याणि अधिकतया खादति चेत् उदरवेदना भवन्तं निश्चयेन बाधते। पुनः वैद्यः द्रष्टव्यः भवेत्" इति उक्तवती।

"मह्यं कदा भक्ष्याणि दत्तवती भवती? उदरवेदना इति मया असत्यम् उक्तम्।

मदर्थम् एव स्थापितानि खलु एतानि? पुनः दाने किमर्थं सङ्कोचः? किं पक्षपातम् आचरति वा भवती?" इति कोपेन पृष्टवान् सत्यनारायणः।

किम् एतत् प्रवर्तते इति न जानाति पाचिका। यजमानस्य बुद्धिः भ्रष्टाः अस्ति इति निश्चितवती सा। झटिति वैद्यम् आनयतु इति उक्त्वा सेवकं वैद्यगृहं प्रेषितवती।



सत्यनारायणः भक्ष्याणि यथेष्टं खादितवान्। पञ्चसु निमेशेषु उदरवेदना आरब्धा, प्रतिक्षणं वृद्धिं गता अपि। तावता वैद्यः आगतः। सः उदरवेदनार्थम् औषधं दत्त्वा ततः निर्गतवान्। वैद्यः आदरेण व्यवहृतवान् आसीत्। 'बाले मयि एतावान् आदरः किमर्थम्?' इति न जानाति सत्यनारायणः। औषधप्रभावतः अल्पे एव काले उदरवेदना न्यूना जाता। सत्यनारायणः उत्थाय उत्पीठिकायाः अन्तःपेटिकातः कुञ्चिकां स्वीकृत्य कपाटिकासमीपं गतवान्। कपाटिकायां योजिते दर्पणे स्वप्रतिबिम्बं दृष्ट्वा सः दिग्भ्रान्तः जातः। दर्पणे पितुः रूपं दृश्यते!

"हा! अनर्थः जातः" इति स्वगतं वदन् सः परिवृत्य पश्यति— किन्तु तत्र पिता न दृश्यते! दर्पणे दृश्यमानः खल्वाटः, श्मश्रुयुक्तः, उपनेत्रधारी च। सत्यनारायणः स्वस्य अङ्गानि पुनः पुनः स्पृष्ट्वा परीक्षितवान्। 'मया कथमपि पितुः रूपं प्राप्तम् अस्ति' इति ज्ञातवान् सः।

पितृरूपप्राप्त्या सः यद्यपि क्षणकालं दिग्भ्रान्तः, तथापि अनन्तरक्षणे नितरां सन्तुष्टः। इतः परं शाला गन्तव्या नास्ति। उपाध्यायस्य ताडनम् अनुभोक्तव्यम् अपि नास्ति। खादने अपि स्वच्छन्दता। अटने अपि स्वातन्त्र्यम्। अत्रत्यस्य समग्रस्य धनस्य स्वामित्वं न अन्यस्य! परमसन्तुष्टः सः नृत्यं कर्तुम् उद्युक्तः शक्त्यभावात् तत्रैव पतितः।

'इदानीं मम पितुः का अवस्था स्यात्?' इति विचारः आगतः सत्यनारायणस्य मनसि।

एतावता केनचित् क्रियमाणः सोपानारोहणशब्दः तेन श्रुतः। अष्टवर्षीयः कश्चित् सोपानानि आरुह्य आगच्छन्

अस्ति। सत्यनारायणः परीक्षादृष्ट्या दृष्टवान्। अहो! स्वस्यैव रूपं तत्!

पिता मदीयं रूपं प्राप्तवान् अस्ति इति ज्ञातवान् सत्यनारायणः। पितरं सम्यक् पीडयिष्यामि इति आलोच्य सः कुञ्चिकां झटिति कोषे स्थापितवान्।

सूर्यः उपरि आगत्य स्वस्य रूपेण स्थितं पुत्रं दृष्टवान्। पुत्रस्य अपि रूपपरिवर्तनं दृष्ट्वा सः उच्चैः हसितवान्। सत्यनारायणः तु मौनं स्थितवान्।

हासं निगृह्य पुत्रं पृष्टवान् सूर्यः– "आवयोः किम् अभवत्? एतत् कथं प्रवृत्तम् इति भवान् किमपि जानाति वा?" इति।

"अहं न जानामि" इति उत्तरं दत्तवान् सत्यनारायणः।

"महती समस्या उपस्थिता खलु भोः? मम शरीरे भवान् अस्ति, भवतः शरीरे अहम् अस्मि इति जनाः कथं जानीयुः? ते कथं वा ज्ञापनीयाः? मम तु बहूनि कार्याणि सन्ति। ऋणत्वेन दत्तं धनं त्वरया प्रतिस्वीकरणीयम् अस्ति। एतेन रूपेण तानि कार्याणि अहं कथं साधयामि? कस्य साहाय्यं प्रार्थयामि? कथञ्चित् मम रूपपरिवर्तनं सप्रमाणं निरूपयामि चेदपि जनाः मयि आदरं प्रकटयेयुः वा? इदानीं मया किं करणीयम्?" इति सखेदम् उक्तवान् सूर्यः।

"यथाकथम् अपि करोतु भवान्" इति उदासीनतया उक्तवान् सूर्यनारायणः।

"इतः परं भवतः विद्याभ्यासस्य का गतिः?" इति आतङ्केन पृष्टवान् सूर्यः।

"एतेन रूपेण शाला गन्तव्या इति वा भवतः आशयः? तत् सर्वथा न शक्यते" इति असमाधानेन उक्तवान् सत्यनारायणः।

"भवान् शालां गच्छतु, मा वा, विद्याभ्यासं करोतु, आलस्येन अटतु वा, तेन मम कापि हानिः नास्ति। यथा रोचते तथा करोतु। मम तु मदीयानां कार्याणां चिन्ता" इति वदन् अन्तःपेटिकायां कुञ्चिकायाः अन्वेषणम् आरब्धवान् सूर्यः।

–(अनुवर्तते)





# पिता पुत्रः च

## २

कपाटिकायाः कुञ्चिकाम् अन्विष्यन्तं पितरं सूर्यं सूर्यवेषेण स्थितः सत्यनारायणः औदासीन्येन पश्यन् स्थितवान्।

''कुञ्चिका कुत्र इति किमपि जानाति वा भवान्?'' इति पुत्रं पृष्टवान् सूर्यः।

''कुञ्चिकां मत्समीपे स्थापितवान् अस्मि'' इति उत्तरं दत्तवान् सत्यनारायणः।

''कुञ्चिकां स्वीकृत्य किं कर्तुम् इच्छति भवान्? ददातु ताम्। बालस्य भवतः कियत् धाष्ट्र्यम्?'' इति कोपेन उक्तवान् सूर्यः।

''मया सह सगौरवं व्यवहरतु। पूर्ववत् बालः न अहम् इति स्मरतु। अगौरवेण व्यवहरति चेत् तस्य फलम् अनुभोक्तव्यं भवेत्। इदानीं ताडनाधिकारः मम, न तु भवतः इति जानाति खलु?'' इति कठोरस्वरेण उक्तवान् सत्यनारायणः।

पुत्रस्य एतादृशं धाष्ट्र्ययुक्तं व्यवहारम् आश्चर्येण पश्यन् अस्ति सूर्यः।

सत्यनारायणः पितरं पुनः उक्तवान्– ''अगौरवेण पश्यन् भवान्, 'मुर्ख! वैधवेय! मन्दबुद्धे!' इत्येवंरूपेण मां सम्बोधयति चेत् पाचिका एव भवतः कर्णलुण्ठनं कुर्यात्। अतः पूर्वापरम् आलोच्य व्यवहरतु। यथाशक्ति अहम् एव एतस्य गृहस्य व्यवहारं निर्वहामि। मध्ये भवतः प्रवेशः मास्तु। इतः पूर्वं कदापि मह्यम् एकं नाणकं वा दत्तवान् आसीत् वा



कार्रयिष्यति वा?'' इति पृष्टवान् सूर्यः।

''भवान् मद्विषये यथा व्यवहृतवान् तथैव व्यवह्रियते मया अपि। इतः पूर्वं भवान् एतत्सर्व कर्तुम् अध्यापकं चोदितवान् आसीत् खलु?'' इति उक्तवान् सत्यनारायणः।

क्षणकालम् आलोच्य पृष्टवान् सूर्यः– ''अध्यापकः घोरं व्यवहरति वा?'' इति।

''तदीयव्यवहारस्य कठोरतां किमिति वदामि? ताडनं तस्य प्रियं कार्यम्। 'ताडने बहवो गुणाः' इति तस्य सिद्धान्तः। विना कारणम् अपि सः सर्वान् बालान् ताडयति। पदे पदे ताडनम् एव अध्यापकधर्मः इति भावयति सः'' इति उक्तवान् सत्यनारायणः।

''एवं तर्हि सः माम् अपि निर्दयं ताडयेत् एव'' इति उद्गारं प्रकटितवान् सूर्यः।

''ताडनात् भीतिः किमर्थम्? अध्यापकः यदा मां ताडयति स्म तदा भवान् एव खलु तं पुनरपि ताडनार्थं प्रोत्साहयति स्म? तस्य दुराचारस्य फलम् इदानीम् अनुभोक्तव्यं भवता'' इति उक्तवान् सूर्यनारायणः

'रूपपरिवर्तनात् नितरां सन्तुष्टः एषः दुष्टः बालः इदानीं प्रतीकारं साधयितुं प्रयतमानः अस्ति। कथम् अपि निग्रहणीयः एषः। अन्यथा एषः सर्वम् अस्तव्यस्तं कुर्यात्' इति आलोचितवान् सूर्यः।

सः कोपेन पुत्रम् उक्तवान्– ''रे मूर्ख! अविवेकिन्! भवतः एषः दर्पः अधिककालम् न प्रचलति। अहं कः, भवान् च कः इति सर्वान्

भवान्? अद्य आरभ्य अहम् एव यजमानः। श्वः आरभ्य भवता शाला गन्तव्या। उपाध्यायेन ताडनं यत् दीयते तत् मौनं सोढव्यं च'' इति।

एतत् श्रुत्वा सूर्यः असमाधानेन कोपेन च गर्जितवान्– ''किं वदति भवान्? पञ्चाशद्वर्षीयः ज्येष्ठः अहं शालां गच्छेयम् इति··?'' इति।

''श्रीमन्! कोपेन किमपि प्रयोजनं नास्ति। श्वः आरभ्य शाला तु गन्तव्या एव भवता। अन्यथा अध्यापकः एव स्वयम् आगत्य दण्डेन सम्यक् पूजयित्वा रुदन्तं भवन्तम् आकृष्य नेष्यति'' इति हसन् उक्तवान् सत्यनारायणः।

''अल्पः बालः भवान् एतत्सर्वं

बोधयिष्यामि अहम्। मयि विद्यमाने, स्वेच्छया व्यवहारः तथा सुलभतया न शक्यः इति सम्यक स्मरतु" इति।

एतत् श्रुत्वा सत्यनारायणः उच्चैः हसितवान्। पितुः कोपात् सः किञ्चिदपि न भीतः। "अहो, सर्वान् बोधयिष्यति वा? बोधयतु कामम्। गृहे स्थितान् प्रतिवेशिनः च आहूय बोधयतु। तदा कस्य वचनं प्रमाणं भवति इति स्वयं ज्ञायते" इति वदन् सत्यनारायणः पाचिकां सीताम् उच्चैः आहूतवान्।

तत्र उपस्थितां सीताम् उक्तवान् सूर्यः– "भोः, अहं यजमानः सूर्यः वदामि। मम पुत्रस्य च शरीरं परस्परं परिवर्तितम् अस्ति" इति।

सीता सूर्यं सत्यनारायणम् एव मन्यमाना आश्चर्येण– "अये उद्धतबाल! कः अयम् असम्बद्धप्रलापः भवतः?" इति पृष्टवती।

"आतपे अटनात् पित्तविकारः जातः इति भाति। एतं पाकशालां नयतु। सः यावत् इच्छति तावत् खाद्यानि, मधुरभक्ष्याणि च ददातु" इति सदर्पं सूचितवान् सत्यनारायणः।

"किम् उक्तं भवता? बालः किमपि प्रलपति चेत् दण्डनीयः खलु सः? भवान् तु वैपरीत्येन व्यवहरन् तस्मै भक्ष्याणि दातुं सूचयति। भवतः एतत् लालनम् एव तं दूषयति, पश्यतु" इति वदन्ती सीता तम् आकृष्य ततः नीतवती।

पाकशालायां सूर्यः आत्मनः नैजं परिचयं दातुं बहुधा प्रयत्नं कृतवान्। किन्तु तस्य सर्वे





प्रयत्नाः विफलाः।

सः गृहस्य कर्मकरं परमेशम् आहूय उक्तवान्– ''भोः, अहं भवतः यजमानः सूर्यः अस्मि'' इति।

''प्रभो! एतद्विषये सन्देहः एव नास्ति मम'' इति वदन् हसन् साभिनयं नमस्कृतवान् परमेशः।

''भोः, मम वचनं सत्यं भोः। अन्यथा मा भावयतु'' इति साग्रहम् उक्तवान् सूर्यः।

''भवदुक्तं सत्यम् एव'' इति हसन् स्वकार्यार्थं ततः निर्गतवान् परमेशः।

इदानीं किं करणीयम् इति न जानाति सूर्यः। तदीयं वचने कोऽपि न विश्वसिति। तेन यद्यत् उच्यते तत्सर्वं सत्यनारायणस्य समीपं गत्वा हसन्तः निवेदयन्ति ते।

सत्यनारायणः सूर्यम् आहूय विवेकं बोधयन् उक्तवान्– ''भोः, त्वरावशात् रूपपरिवर्तनविषयं सर्वान् वदति चेत् श्रोतारः भवन्तं भ्रष्टमतिं मन्यन्ते। भवन्तं बलात् चिकित्सालयं प्रेषयिष्यन्ति। अतः मौनं स्थितिः एव वरम्। यत् भवेत् तत् भवतु नाम'' इति।

पाचिका सीता सत्यनारायणस्य विषये चिन्तयति– 'हा हन्त! अल्पः बालः एषः! उदरवेदनाव्याजेन शालां न गतः इत्यतः तस्मै आहारस्यैव अदानं सर्वथा अनुचितम्। अहम् एव तम् आहूय प्रीत्या किमपि दातुम् अपि न शक्नोमि। यतः यजमानः अद्य लज्जालुः वधूः इव गृहे एव तिष्ठति। बहिर्गमनसूचना अपि न दृश्यते' इति।

तावता सा स्मृतवती यत् गृते तण्डुलादीनि कानिचन प्रमुखवस्तूनि न सन्ति इति। अतः सा अट्टम् आरुह्य गत्वा यजमानम् उक्तवती– ''तण्डुलाः न सन्ति इति प्रातः एव उक्तम् आसीत् मया। तण्डुलाः इदानीम् एव आनेतव्याः। तेनैव सह अन्यानि अपि कानिचन वस्तूनि आनयतु तावत्'' इति।

एतत् श्रुत्वा सूर्यशरीरधारी सत्यनारायणः उच्चैः हसितवान्। एतत् दृष्ट्वा सीता आश्चर्येण तस्य मुखं पश्यति। यतः यजमानः स्वभावेन गम्भीरः। अद्य तु विना कारणं बालः इव उच्चैः हसन् अस्ति!

आसन्दे उपविष्टः सत्यनारायणः उत्थाय

कोषे स्थितायाः कुञ्चिकायाः साहाय्येन कपाटिकाम् उद्घाट्य तत्रस्थं धनं बहुकालं गणितवान्। अनन्तरं किञ्चित् धनं कोषे. संस्थाप्य ततः निर्गतवान्।

यजमानस्य निर्गमनस्य अनन्तरं पाचिका सीता आहूतवती– "सत्य! सत्यनारायण!" इति। पितुः अनुपस्थितौ सत्यनारायणः यत्र तिष्ठति तत्र महान् कोलाहलः प्रतिदिनं सहजः। अद्य तु तादृशः कोलाहलः एव न श्रूयते! सर्वत्र नीरवता!

"सत्य! सत्यनारायण! कुत्र गतः भवान्" इति वदन्ती पाचिका सत्यनारायणनिमित्तं सर्वत्र अन्वेषणं कृतवती। अन्ते तया पितुः प्रकोष्ठे महति आसन्दे चिन्तामुद्रया उपविष्टः सत्यनारायणः दृष्टः।

"अत्र अस्ति वा भवान्? माम् आटयति खलु भवान्? यावत् आह्वयामि चेदपि प्रत्युत्तरम् एव नास्ति भवतः" इति प्रीतिपूर्णेन स्वरेण आक्षिप्तवती सीता।

सूर्यः दिग्भ्रान्तः सन् तां दृष्ट्वा– "मां किमर्थं वृथा पीडयति? स्वकार्यं पश्यतु भवती" इति असमाधानेन उक्तवान्।

"किं भोः एतत्? अधिकारवाण्या माम् एव आदिशति खलु? सत्य! अहं वदामि, शृणोतु-एतादृशः व्यवहारः न उचितः। अद्य भवान् अन्यथा व्यवहरन् अस्ति। एतत् भवतः हिताय न भवेत्" इति उक्त्वा ततः गता सीता खाद्यानि मधुरभक्ष्याणि च स्थालिकायां स्थापयित्वा आनीय उत्पीठिकायाः उपरि स्थापितवती। जलम्



अपि आनीय स्थापितवती। खाद्यवस्तूनि आनीय स्थापितवतीं सीतां क्षणकालं तदेकदृष्ट्या दृष्टवान् सूर्यः। अनन्तरं सः महतीं बुभुक्षां स्मरन् तानि सर्वाणि वेगेन खादितवान्।

सूर्यस्य निश्शक्तिः अपगता। एतावत् खादितं चेदपि उदरवेदनायाः सूचना काऽपि नास्ति। शरीरे कश्चन उत्साहः दृश्यते। रूपपरिवर्तनात् खिन्नं तदीयं मनः इदानीं किञ्चित् उल्लासयुक्तम् अस्ति। रूपपरिवर्तनात् केचन लाभाः अपि सन्ति इति सः भावयति इदानीम्। 'चिरकालम् पीडयन्ती स्थिता उदरवेदना इदानीम् अदृश्यतां गता अस्ति। इतः परं यथेष्टं खादितुं शक्यते प्रायः। अटनं, धावनं, कर्दनम्, उत्प्लवनम् इत्यादीनि न क्लेशाय। रूपपरिवर्तनेन अपि कश्चन आनन्दः जायते' इति आलोचयति सः।

सत्यनारायणस्य तु रूपपरिवर्तनात् सन्तोषः एव। कोषे धनं स्थापयित्वा गृहात् निर्गतः सः साक्षात् आपणं गतवान्। वणिक् शिवश्रेष्ठी यत् मूल्यं सूचितवान् तेनैव मूल्येन अपेक्षितानि सर्वाणि वस्तूनि क्रीतवान्। दर्पेण एव श्रेष्ठिने धनं दत्तवान्। अनन्तरं कञ्चन कर्मकरम् आहूय 'एतानि वस्तूनि स्वीकृत्य माम् अनुसरतु' इति उक्त्वा गृहं प्रति प्रस्थितवान्। मार्गे गोलिकाः पाञ्चालिकाः च दृष्टाः। ताः अपि क्रीतवान् सः।

मार्गे मिलिताः बहवः ज्येष्ठाः "नमस्कारः श्रीमन्!" इति वदन्तः तं नमस्कृत्य अग्रे गतवन्तः। माम् अपि ज्येष्ठाः नमस्कुर्वन्तः सन्ति इति सन्तोषः सत्यनारायणस्य। 'एतान् सर्वान् सुलभतया वञ्चितवान् अहम्' इति मनसि एव हसति सः। एवं नमस्कृतवत्सु बहवः परिचिताः एव। केचन अपरिचिताः अपि तेन मिलिताः आसन्। 'एवं मिलिताः अज्ञाते विषये किमपि पृच्छन्ति चेत् किम् उत्तरं दातव्यम्?' इति तस्य आतङ्कः। किन्तु दैववशात् तादृशी परिस्थितिः न आगता। – (अनुवर्तते)





# पिता पुत्रः च

## ३

**आ**पणतः प्रस्थितः सत्यनारायणः यावत् गृहं प्राप्तवान् तावता अन्धकारः प्रसृतः आसीत्। गृहे दीपाः प्रकाशन्ते स्म।

गृहस्य पार्श्वभागतः अन्धकारमयात् प्रदेशात् आगतः कश्चन षीष्कारः श्रुतः सत्यनारायणेन। सुपरिचितं तं षीष्कारं श्रुतवतः तस्य सन्तोषः प्रवृद्धः। 'एषः षीष्कारः मित्रस्य रङ्गस्य एव' इति निश्चित्य सः उत्तररूपेण षीष्कारं कर्तुं प्रयत्नं कृतवान्। किन्तु 'फू-हू' इति कश्चन ध्वनिः मुखात् निर्गतः, न तु षीष्कारः। 'धिक् माम्' इति आत्मानं निन्दितवान् सः।

एतावता सः रङ्गस्य समीपम् आगतः आसीत्। समीपम् आगतम् एतम् आश्चर्येण पश्यति रङ्गः। मन्दप्रकाशे स्थूलं शरीरं, पलितं श्मश्रु, उपनेत्रं, केशरहितं शिरः च तेन दृष्टम्।

सत्यनारायणः पुनरपि द्वित्राणि पदानि अग्रे गत्वा– "किमर्थं तथा पश्यति? अहं भोः उपस्थितोऽस्मि" इति उक्तवान्। 'आगतः सत्यनारायणस्य पिता' इति ज्ञातवतः रङ्गस्य हृदयं क्षणकालं स्तब्धम् इव।

'रङ्गस्य स्नेहः सर्वथा मास्तु' इति एषः एव पूर्वं सत्यनारायणं तर्जनपूर्वकं बोधितवान् आसीत्। तथापि रङ्गेण सह गतवन्तं तं ताडितवान् आसीत् अपि। अतः एव रङ्गः सत्यनारायणस्य आह्वानार्थं गृहस्य अन्तः पुरतः वा न गच्छति। पार्श्वे कुत्रापि स्थित्वा



"किमपि नास्ति भोः" इति वदन् सत्यनारायणः त्वरया गृहस्य अन्तः गतवान्।

कर्मकरः सर्वाणि वस्तूनि गृहे स्थापयित्वा गतवान् आसीत्। सीता तत्तदुचिते स्थाने वस्तूनां स्थापने मग्ना आसीत्।

रात्रौ सत्यनारायणः पितुः शय्यायाम् एव शयनं कृतवान्। तस्यां रात्रौ तेन समीचीना निद्रा न प्राप्ता। इतः पूर्वं सः शयनसमनन्तरम् एव गाढनिद्रां प्राप्नोति स्म। प्रातःकालपर्यन्तम् अखण्डा निद्रा! किन्तु अद्य न तथा। निद्राप्राप्तौ एव विलम्बः। अनन्तरम् अपि न गाढता। पुनः पुनः जागरणं भवति स्म। रात्रौ पुनः पुनः पार्श्वपरिवर्तनं कुर्वन् समयं यापितवान् सः। उषःकालात् पूर्वम् एव जागरणं प्राप्तं तेन।

शय्यातः उत्थितः सः किं करणीयम् इति अजानन् गृहे इतस्ततः सञ्चारं कृतवान्। पार्श्वप्रकोष्ठं गत्वा दर्पणे स्वस्य पलितं श्मश्रु, केशरहितं शिरः च द्रष्टुं प्रयत्नं कृतवान्। उपनेत्रस्य अभावतः सः सुस्पष्टं द्रष्टुं न शक्तवान्।

मनसि विविधाः चिन्ताः सन्ति चेदपि सूर्यः तु शीघ्रं शयनं कृत्वा गाढनिद्रां प्राप्तवान्। सूर्यकिरणाः उदिताः चेदपि सः न उत्थितवान्। अल्पवयस्कं शरीरं खलु तस्य?

अत्रान्तरे शालातः कश्चन बालकः आगतवान्। सत्यनारायणं सः सम्यक् जानाति। तथापि सत्यनारायणः वेषान्तरेण आत्मानं निगूह्य षीष्कारेण आगमनं सूचयति। एतस्य तात्पर्यं जानन् सत्यनारायणः मन्दं बहिः आगच्छति। एषः दैनन्दिनः क्रमः। 'अद्य तु रहस्यम् उद्घाटितम् अभवत्, यतः सूर्यः एव उपस्थितः अस्ति' इति आलोच्य भीतः रङ्गः ततः पलायनं कृतवान्।

"भोः, किमर्थं तथा धावति भवान्? कुतः भीतिः भवतः? मूर्ख! आगच्छतु अत्र" इति उच्चस्वरेण आहूतवान् सत्यनारायणः।

"किं श्रीमन्? तं बालकं तथा उच्चैः आह्वयति? किं कृतं तेन?" इति वदन् कश्चित् तत्र आगतवान्। 'इतःपरं मार्गे स्थितिः उचिता न भवेत्' इति आलोच्य

अस्ति इत्यतः परिचयम् अप्राप्नुवन् उक्तवान्– "भवतः पुत्रः सत्यनारायणः कुत्र? 'तम् आनयतु' इति उक्त्वा अध्यापकः मां प्रेषितवान्" इति।

शयनात् उत्थितः सूर्यः पूर्वाभ्यासानुगुणं पाचिकां सीताम् आहूतवान्। तस्य आह्वानं श्रुत्वा अपि सीता प्रत्युत्तरं न दत्तवती। अत्रान्तरे अन्तः एव आगतः शालाबालकः सूर्यं दृष्ट्वा– "भोः, अविलम्बेन भवन्तम् आनेतुं सूचितवान् अस्ति अध्यापकः" इति उक्तवान्।

"अहो! साक्षात् अन्तः एव आगतः अयं वराकः। अये, निर्गच्छतु इतः। अध्यापकम् एव अत्र आगन्तुं वदतु" इति असमाधानेन उक्तवान् सूर्यः।

किन्तु तस्य असमाधानं को वा गणयति? शालातः आगतः सः बालकः दृढकायः, धीरः च। इतरे बालकाः सर्वे तस्य दर्शनात् भीताः भवन्ति। यः कोऽपि शालां न आगतः चेत् एतम् एव प्रेषयति अध्यापकः। तेन बलात् आकृष्य नीयमानः सूर्यः अनिवार्यतया शालां गतवान्।

सूर्यं दृष्ट्वा अध्यापकः महता कोपेन दण्डम् उन्नीय– "अये उद्धत! शालां प्रति आगमनं स्मारणीयं खलु? हस्तं प्रसारयतु तावत्" इति वदन् तस्य हस्ते ताडनानि दत्तवान्। तं भित्तेः पार्श्वे आसन्दाकारेण उपवेश्य– "अये! भवतः पिता तु परमसज्जनः। तादृशस्य पुत्रः भवान् एवम् आचरति खलु! कुलकलङ्क! भवतः दौष्ट्यं





प्रवर्धमानम् अस्ति। कतिविधानि दण्डनानि अहं जानामि इति परिचाययामि अद्य'' इति सम्यक् निन्दितवान्।

एतत् श्रुतवतः सूर्यस्य नेत्राभ्याम् अश्रूणि आगतानि। किन्तु किं वा कर्तुं शक्येत, सर्वं मौनम् अनुभोक्तव्यं तेन।

शिक्षकस्य पाठनवैखरीं, बालानां पठनपद्धतिं, चटुलतां च दृष्ट्वा आश्चर्यम् अनुभवति सूर्यः। 'कीदृशः अध्यापकः एषः! अहो, कीदृशाः छात्राः एते! सत्यनारायणः एतादृशे नीरसे परिसरे निरर्थकं पठनं कुर्वन् अस्ति वा? अहो दौर्भाग्यम्!'

किञ्चित्कालानन्तरं सर्वे छात्राः समूहरूपेण गुणनमालां रटितवन्तः। यावन्तः छात्राः तावन्तः स्वराः पृथक् श्रूयन्ते! काकानां रटनम् अतिशेते स्म अयं कोलाहलः। अध्यापकः तु 'कोऽपि कोलाहलं न कुर्यात्' इति आज्ञाप्य भित्तिम् आलम्ब्य नेत्रे निमील्य, मुखं किञ्चित् उद्घाट्य निद्रां कृतवान्। इहप्रपञ्चं विस्मृतवतः तस्य मुखात् 'घुर् घुर्' इति शब्दः निस्सरति स्म।

अध्यापकं निद्रामग्नं निश्चित्य सर्वे बालकाः सूर्यं परितः आगत्य स्थितवन्तः। सूर्यः तु तेषु कमपि नाम्ना अपि न जानाति। एषः धाष्ट्र्यकारणतः अस्माभिः सह सम्भाषणं न करोति इति चिन्तयन्ति ते। अतः ते तं पीडयितुम् आरब्धवन्तः। एकः कर्णलुण्ठनं करोति। अपरः पृष्ठभागे ताडयति। अन्यः शिरसि कुट्टयति। इतरः हस्तम् आकर्षति। बालानाम् एतादृशीं पीडां दृष्ट्वा सूर्यः नितरां कुपितः। अन्ते वेदनाम् असहमानः सः उच्चैः आक्रन्दनं कृतवान्। 'इदानीम् अध्यापकः उत्तिष्ठति' इति जानन्तः सर्वे बालकाः स्वस्थाने मौनम् उपविष्टवन्तः।

आक्रन्दनश्रवणेन अध्यापकः जागरितः अभवत्। 'कुतः आक्रन्दनम् आगतम्?' इति सः परितः दृष्टिं प्रसारितवान्। आसनात् उत्थाय दण्डेन सूर्यं सम्यक् ताडयित्वा– 'न जाने पशुः अयं किं वा पठेत् इति' इति उद्गारं प्रकटितवान्।

ताडनेन निन्दनेन च कुपितः सूर्यः– ''अये अध्यापकापसद! शालायां निद्रां कुर्वन् कीदृशः शिक्षकः भवान्? ताडनं विना भवान्

किमपि अन्यत् जानाति वा? मुग्धान् बालान् विनाकारणं निर्दयं ताडयति खलु? चण्डाल! नरकं गमिष्यति भवान्" इति अध्यापकं निरन्तरं तर्जितवान्।

एतत् श्रुत्वा कक्ष्यायां स्थिताः सर्वे बालकाः उच्चैः हसितवन्तः। क्रुद्धः अध्यापकः तीक्ष्णदृष्ट्या सूर्यं पश्यन्– "अये दुष्ट! माम् उपदिशति वा? भवतः मदम् अपनयामि अद्य। पुनरपि आसन्दाकारेण उपविशतु तावत्" इति वदन् तं आसन्दाकारेण उपवेशितवान्।

एतावता अपि अध्यापकः न तृप्तः। सः पुस्तकम् उद्घाट्य एकैकशः प्रश्नान् प्रष्टुम् आरब्धवान्। सामान्यज्ञानाधारितानां बहूनां प्रश्नानाम् उत्तरं दत्तवान् सूर्यः। आश्चर्यम् अनुभवन् अध्यापकः कठिनान् प्रश्नान् पृष्टवान्। पुस्तकाध्ययनं विना तेषाम् उत्तरदानम् असाध्यम् आसीत्। अतः मौनं स्थितवान् सूर्यः। 'प्रश्नानाम् उत्तरं न जानाति वा भवान्?' इति वदन् पुनः ताडितवान् अध्यापकः।

एतदनन्तरं गणितविषये प्रश्नाः आरब्धाः। प्राथमिकांशसम्बद्धानां प्रश्नानाम् उत्तरं लीलया उक्तवान् सूर्यः। 'गणिते सर्वथा अज्ञः अयम् अद्य कथं सर्वेषां प्रश्नानाम् उत्तरं वदति?' इति आश्चर्यम् अनुभवति अध्यापकः।

"अये! उद्धत! गणिते एतावत् परिज्ञानम् अस्ति भवतः। तथापि एतावत्पर्यन्तं मौढ्यं प्रदर्शयन् मां वञ्चयति स्म खलु?" इति वदन्



अध्यापकः पुनः ताडितवान्।

'कदा मध्याह्नः भवेत्? कदा घण्टावादनं स्यात्? कदा वा शालातः विमोचनं स्यात्?' इति प्रतीक्षमाणः अस्ति सूर्यः। अन्ते घण्टा वादिता। अध्यापकः उत्थाय गतवान्। छात्राः अपि केचन गृहं प्रति धावितवन्तः। अन्ये केचन निश्चिन्ताः सन्तः मन्दगत्या प्रस्थितवन्तः। किन्तु ते सर्वे उत्साहेन सन्ति। सूर्यः एकः एव निरुत्साहेन अस्ति।

सामान्यतः बालाः शालायां प्राप्तं ताडनम् अवमाननं वा बहिः आगत्य सर्वथा विस्मरन्ति। किन्तु सूर्यः तु मनसा प्रौढः खलु? सः आत्मना प्राप्तम् अवमाननं विस्मर्तुं न शक्नोति। चिन्तया मन्दम् आगच्छन्तं सूर्यं परितः स्थित्वा केचन बालकाः– "अये सत्य! भवतः किं जातम्? किम् अस्वस्थः? उत अस्माकम् उपरि कोपः? नूतनः पुरुषः इव लक्ष्यते भवान्। सर्वथा भिन्नः अस्ति भवतः व्यवहारः" इति उक्तवन्तः।

"आम्, अहं नूतनः। अहं सत्यनारायणः न। मां न पीडयन्तु। गच्छन्तु इतः" इति तान् उक्तवान् सूर्यः।

बालकाः आश्चर्येण भीत्या च सूर्यं पश्यन्तः एकैकशः ततः दूरं गतवन्तः। सूर्यः मौनं गृहं गच्छन् आलोचयति– 'गृहं गत्वा किं करोमि? गृहे इदानीं सत्यनारायणः किं कुर्वन् स्यात्? एतावता तस्य रहस्यं प्रकटितं स्यात् वा?' इति।

एतादृश्या आलोचनया तस्य आशा उज्जीविता। 'अहम् आत्मानं सूर्यं वदामि चेत् कोऽपि न विश्वसिति। सर्वे सत्यनारायणं मां भावयन्तः सन्ति। एतावता मम आत्मीयाः बहवः सत्यनारायणसमीपम् आगताः स्युः। व्यावहारिकविषयेषु वार्तालापं कृतवन्तः स्युः। तेषु विषयेषु सत्यनारायणः किं वा जानाति? अतः एतावता तदीयं रहस्यं प्रकटितं स्यादेव। तथा चेत् मदीयं रहस्यम् अपि निरूपितं भविष्यति' इति आलोचयन् सः उत्साहेन गृहं प्राप्तवान्।

– (अग्रिमसञ्चिकायां समाप्ता भविष्यति।)





# पिता पुत्रः च

## ४

''आगच्छतु वत्स! महती बुभुक्षा स्यात् खलु भवतः? प्रातः अपि भवान् किञ्चित् एव भुक्तवान्'' इति वदन्ती पाचिका सीता सूर्यं लालयन्ती अन्तः नीत्वा भोजनं परिवेषितवती। भोजनसमये आतङ्केन सूर्यं पृष्टवती सा– ''शालायाम् अध्यापकः ताडितवान् तु न स्यात् खलु?'' इति।

सूर्यः लज्जया शिरः अवनमय्य मौनं स्थितवान्। विषयपरिवर्तनं कर्तुम् इच्छन् सीतां पृष्टवान् सः– ''माम् अन्विष्य कोऽपि आगतः आसीत् वा?'' इति।

''भवन्तम् अन्विष्य को वा आगच्छेत् भोः?'' इति हसन्ती पृष्टवती सीता।

सत्यनारायणस्य विषये किमपि प्रष्टव्यम् इति चिन्तयति सूर्यः। किन्तु साक्षात् प्रष्टुं सङ्कोचः। दैववशात् तावता सीतायाः मुखात् एव सत्यनारायणसम्बन्धी विषयः निर्गतः– ''भवतः पितरम् अन्विष्यन्तः बहवः आगतवन्तः। किन्तु तस्य अस्वास्थ्यम् इति भाति। सः द्वित्रान् केवल दृष्ट्वा किञ्चित् एव वार्तालापं कृत्वा– 'अद्य अन्येन केनचित् अपि सह वार्तालापं न इच्छामि' इति उक्त्वा प्रकोष्ठे सुप्तवान्। काचित् चिन्ता तं बाधते इति भाति'' इति।

''के के आगताः आसन्?'' इति कुतूहलातिशयेन पृष्टवान् सूर्यः।

''आगतेषु द्वित्रान् अहं जानामि। अन्येषां परिचयः नास्ति मम'' इति वदन्ती



परिचितानां तेषां नाम उक्तवती सीता। सूर्यः त्वरया भोजनं समाप्य स्वप्रकोष्ठं गत्वा द्वारं ताडितवान्। बहुवारं ताडनेन अपि अन्तर्भागतः कापि प्रतिक्रिया न आगता।

सूर्यः पुनरपि वेगेन बलात् च द्वारं ताडितवान्। तदा अन्तर्भागतः प्रश्नः आगतः– "कः सः?" इति।

"अहं भोः। द्वारम् उद्घाटयतु। सम्भाषणीयम् अस्ति" इति उक्तवान् सूर्यः।

"अहम् इदानीं न उत्तिष्ठामि। रात्रौ वार्तालापं करिष्यावः तावत्" इति उक्तवान् सत्यनारायणः।

"द्वारम् उद्घाटयतु भोः" इति कोपेन उच्चैः उक्तवान् सूर्यः। तत् श्रुत्वा आगतः कर्मकरः सूर्यं बलात् अधः नीतवान्।

"भोः! एवं विना कारणं कोलाहलः न उचितः। यजमानः कुपितः भवति चेत् दन्तान् पातयेत्। जागरूकः भवतु" इति सूर्यम् उक्त्वा ततः निर्गतवान् सः कर्मकरः।

सूर्यस्य मनसि इदानीं विविधाः विचाराः। यैः सह मम व्यवहारः अस्ति तेभ्यः सर्वेभ्यः पत्रं लिखामि इति चिन्तितवान् सः। किन्तु मम हस्ताक्षरं भिन्नम् इत्यतः ते न विश्वसेयुः इति अपरः विचारः आगतः। समस्यायाः परिहारः कथम् इति सः बहुधा चिन्तयति। योग्यः मार्गः तु न स्फुरति एव। 'इतः परम् अल्पे एव काले शाला गन्तव्या। तावति काले किं समस्यायाः परिहारं चिन्तयामि, उत बाह्यव्यवहारविषये चिन्तयामि? सत्यनारायणस्य नैजं स्वरूपं यावत् प्रकटितं न भवति तावत् मम वचनेषु कोऽपि न विश्वसिति। एवं तर्हि इतः पलाय्य किञ्चित्कालं गृहात् दूरे तिष्ठामि चेत् कथम्? पलायनार्थम् अपि धनम् आवश्यकं खलु? धनप्राप्त्यर्थं कः उपायः आश्रयणीयः? अथवा धनं विना एव इतः निर्गच्छामि। यत् भवति तत् भवतु नाम' इति चिन्तितवान् सूर्यः।

पाचिका सीता, अन्ये कर्मकराः च यथा न जानीयुः तथा निर्गत्य रेलयानस्थानकं गतवान् सूर्यः। द्विवादनानन्तरम् एकं यानं ततः निर्गमिष्यति इति ज्ञातम्। 'तस्मिन् याने

उपविश्य गच्छामि। कुत्र गत्वा किं करणीयम् इति अनन्तरं चिन्तयिष्यामि' इति निश्चितवान् सः।

गृहे स्थितः सत्यनारायणः तु द्वारं पिधाय आदिनं प्रकोष्ठे एव स्थितवान्। दश रूप्यकाणि ऋणरूपेण प्रष्टुम् आगतवान् कश्चित्। तस्य नामादिकम् अपृष्ट्वा सीताद्वारा तस्मै धनं प्रेषितवान् सत्यनारायणः। अपरः कश्चित् आगत्य 'विंशतिः रूप्यकाणि दातव्यानि सन्ति सूर्येण' इति सीताम् उक्तवान्। तस्मै अपि तावन्ति रूप्यकाणि दत्तवान् सत्यनारायणः। वार्तालापार्थं ये आगताः तान् अनारोग्यव्याजम् उक्त्वा प्रतिप्रेषितवान्।



एवं पदे पदे कष्टम् अनुभवति सत्यनारायणः। तस्य अपरा समस्या नाम– सीता कर्मकराः च तदीयं व्यवहारं सन्देहेन पश्यन्ति स्म। सीता तु तम् आश्चर्येण पश्यति। 'मम व्यवहाराः वचनानि च मदीयानि इव भासन्ते, उत न? मम व्यवहारम् अन्ये सन्देहेन पश्यन्तः सन्ति वा? सन्देहः एकवारम् आगतः चेत् ते सूक्ष्मपरिशीलनं कर्तुम् आरभन्ते। तदा वस्तुस्थितिः प्रकटिता भवेत् अपि। अन्यत्र पिता तु सर्वथा अहम् इव न व्यवहरति। तस्य व्यवहारे प्रौढत्वं स्फुटं दृश्यते। तदीये मुखे ज्येष्ठत्वस्य कान्तिः अपि दृश्यते। मम मुखे अपि बालत्वस्य कान्तिः मया स्वयं दर्पणे दृष्टा। एतत् वैलक्षण्यम् अन्ये ज्ञातवन्तः स्युः खलु? सीता तु एतादृशेषु विषयेषु सदा जागरूका एव' इति बहुधा आलोचयति सत्यनारायणः।

अन्धकारः सर्वत्र प्रसृतः। तथापि सत्यनारायणः प्रकोष्ठात् अन्यत्र गन्तुं न इच्छति। 'पित्रा सह वार्तालापार्थं कश्चित् रात्रौ अपि आगच्छेत्' इति जानाति सः।

अष्टवादनसमये पाचिका सीता आगत्य उक्तवती– "श्रीमन्! बालकः इतोऽपि न प्रत्यागतः। अष्टवादनम् अतीतम्" इति।

"शालातः सः गृहम् आगतवान् आसीत् वा न वा?" इति पृष्टवान् सत्यनारायणः।

"सः मध्याह्ने शालां न गतवान् एव। कुत्रापि क्रीडनार्थं गतवान् स्यात्" इति



उक्तवती सीता।

"किमर्थं शालां न गतवान् सः? बलात्कारेण वा भवत्या सः शालां प्रेषणीयः आसीत्" इति उक्तवान् सत्यनारायणः।

"श्रीमन्! बालस्य विषये कोपं बलात्कारं वा प्रदर्शयितुम् अद्य अहं न शक्नोमि। सः ऋजुदृष्ट्या पश्यति चेदपि मम भीतिः भवति। न जाने, किं कारणम् इति" इति उक्तवती सीता।

"एवं तर्हि सः कुत्र गतवान् स्यात्?" इति आतङ्केन पृष्टवान् सत्यनारायणः। आतङ्कस्य कारणं पिता न दृश्यते इति न, अपि तु पित्रा रहस्यं कदाचित् प्रकट्येत इति।

"बालः सः सकुशलं स्यात्। सद्यः आगच्छेत्। भवान् भोजनं समापयतु" इति उक्तवती सीता।

"इदानीं मास्तु, किञ्चित्कालानन्तरं भोजनं करिष्यामि अहम्" इति उक्तवान् सत्यनारायणः।

"किम् एतत्? भोजनानन्तरं घण्टाद्वयं यावत् मन्दं सञ्चारः करणीयः इति वैद्येन सूचितं विस्मृतं वा? उदरदोषः तु अनुवर्तते एव। अतः शीघ्रं भोजनं समापयतु" इति अधिकारवाण्या उक्त्वा ततः गतवती सीता।

सत्यनारायणः प्रतिवचनं किमपि अनुक्त्वा गत्वा भोजनं समापितवान्। हस्तं प्रक्षाल्य यावत् सः बहिः आगतः तावता कश्चित्– 'अये सूर्य!' इति वदन् गृहं प्रविष्टवान्। तथा आगतः न्यायवादी परमेश्वरः। सः पितुः आत्मीयं मित्रम्। गृहस्य सर्वे न्यायालयीयाः व्यवहाराः तेनैव निरुह्यन्ते स्म। सः तदा तदा एवं गृहम् आगच्छति। तादृशे सन्दर्भे तयोः मध्ये यः वार्तालापः प्रचलति तस्य पूर्वापरं किञ्चिदपि न जानाति सत्यनारायणः।

न्यायवादी परमेश्वरः पूर्वतनाभ्यासस्य अनुगुणं सत्यनारायणम् अनुसृत्य अट्टम् आरुह्य आगतवान् एव। आसन्दे उपविश्य सः किमपि किमपि उक्तवान्। विषयः तु न्यायालयसम्बन्धी। सत्यनारायणेन एतावत् एव ज्ञातं यत् श्वः न्यायालयः गन्तव्यः इति। "भोः, भवान् एव एतस्मिन् व्यवहारे प्रबलः साक्षी" इति वदन् न्यायवादी

अनन्तरदिने न्यायालये यद्यत् वक्तव्यं तत्सर्वं विस्तरेण बोधितवान्। तत्र एकः अंशः अपि सत्यनारायणेन न अवगतः।

दशवादनपर्यन्तं सर्वम् उक्त्वा परमेश्वरः निर्गतवान्। किन्तु सत्यनारायणस्य मनःशान्तिः नास्ति। 'पिता कुत्र गतः? तस्य का गतिः जाता स्यात्? श्वः किं प्रवर्तेत?' इत्येवं निरन्तरं चिन्तयति सः।

पितुः विषये सगम्भीरं चिन्तयति सत्यनारायणः। 'एषः प्रपञ्चः ज्येष्ठानाम् एव, न तु मादृशानां बालानाम्। क्लिष्टान् विषयान् ते एव ज्ञातुं समर्थाः। पितरं सम्यक् अनवगच्छता मया दोषः कृतः। वस्तुतः पिता किम् अहितं कृतवान्? न किमपि। 'शालां गत्वा सम्यक् पठतु' इति एतावान् एव आसीत् तस्य आदेशः। विनयेन व्यवहरतु इति मां सूचयति स्म सः। मया निर्वोढुम् अशक्यान् बहून् व्यवहारान् सः लीलया निर्वहति स्म। इतः परं यदि अहं बालः भवेयं तर्हि पितरम् अकोपयन् विनयेन व्यवहरेयम्' इति आलोचितवान् सत्यनारायणः।

एतस्मिन् एव समये गृहस्य पुरतः अन्धकारमये प्रदेशे सोपानानाम् उपरि उपविष्टः अस्ति सूर्यः। सः पलायनम् इच्छन् गृहात् निर्गतः आसीत् खलु? रेलूयानम् आरूढं तेन। किञ्चिद्दूरं गमनानन्तरं चिटिकापरीक्षकः आगतः। सः एतं चिटिकां पृष्टवान्। सूर्यः शरीरेण बालः चेदपि मनसा



प्रौढः एव खलु? अतः तदीयं मुखं विवर्णं जातम्। एतावता एव सः परीक्षकः ज्ञातवान् यत् अयं चिटिकारहितः यात्रिकः इति। चपेटां दत्त्वा यानात् एतम् अवतारितवान् सः।

अनन्यगतिकः सूर्यः पादाभ्याम् एव सुदीर्घं प्रयाणं कुर्वन् रात्रौ एकादशवादनसमये धूल्या स्नातः सन् गृहं प्रत्यागतवान्।

'इतः परम् अपि बालकरूपेण दिनानि किं, क्षणान् अपि यापयितुं न शक्नोमि। एषः प्रपञ्चः बालकानां कृते न। मम बाल्ये यत् अनुभूतं तत् किमपि इदानीं न स्मर्यते मया। पुत्रस्य हितार्थम् एव मया बोधनं कृतम्। सः खेदनीयः इति विचारः न मम सर्वथा न



आसीत्। एषु दिनेषु मया तेन सह प्रीत्या व्यवहारः एव न कृतः। पिता कश्चित् कदापि एवं न करोति खलु? भगवद्दयया यदि अहं पूर्वतनं रूपं प्राप्नुयां तर्हि पुत्रं प्रीत्या एव पश्येयम्' इति आलोचयन् सूर्यः नेत्रे निमील्य भगवन्तं प्रार्थितवान्– "भगवन्! पूर्वतनरूपेण माम् अनुगृह्णातु कृपया। इतः परं पुत्रं न पीडयिष्यामि अहम्" इति।

एतत्सर्वं पश्यन्ती स्थिता लक्ष्मीदेवी श्रीमन्नारायणम् उक्तवती– "तयोः उभयोः अपि अपेक्षां पूरयतु कृपया" इति।

"यथा भवती इच्छति तथैव भवतु तावत्" इति उक्तवान् नारायणः।

सोपानानाम् उपरि उपविष्टः सूर्यः मध्यवयस्कस्य स्वस्य रूपम् एव प्राप्तवान्। प्रकोष्ठे मञ्चे सुप्तः सत्यनारायणः अपि स्वकीयं पूर्वतनं शरीरं प्राप्तवान्।

"इतः परं तौ सुखेन तिष्ठतः। यतः द्वाभ्याम् अपि विवेकः प्राप्तः अस्ति" इति उक्तवती लक्ष्मीः।

"किं भवति इति तु सद्यः ज्ञायते एव" इति हसन् उक्तवान् श्रीमन्नारायणः।

सूर्यः सोपानात् उत्थितवान्। स्वस्य शरीरम् उन्नतम् इव अभासत। किन्तु रूपपरिवर्तनं सः न जानाति स्म एव। 'उच्चैः द्वारताडनशब्दः कृतः चेत् सर्वेऽपि जागरिताः भवेयुः। एकः जागरितः भवति चेत् चिन्ता नास्ति। तस्य मनःसमाधानं यथा स्यात् तथा किमपि वक्तुं शक्येत' इति आलोच्य सूर्यः मन्दं द्वारताडनशब्दं कृतवान्।

पाचिका सीता आगत्य द्वारम् उद्घाटितवती। 'एतावत्पर्यन्तं कुत्र गतवान् आसीत् भोः भवान्?' इति पृच्छन्ती आगता सा पुरतः सूर्यं दृष्ट्वा आश्चर्यम् अनुभवन्ती– "श्रीमन्! भवान् कदा बहिः गतवान्? प्रकोष्ठे सुप्तः आसीत् खलु भवान्? भवति बहिः स्थिते कः द्वारं पिहितवान्?" इति पृष्टवती।

तस्याः प्रश्नस्य विषये लक्ष्यम् एव नास्ति सूर्यस्य। सा मां 'श्रीमन्!' इति सम्बोधितवती इति सः नितरां सन्तुष्टः।

सन्तोषातिरेकेण सः स्वमुखं स्पृष्टवान्। तत्र श्मश्रु उपनेत्रं च दृश्यते। शिरः स्पृष्टं तेन। खल्वाटता अनुभूता तत्र! तस्य नेत्राभ्याम् आनन्दाश्रूणि आगतानि। मुखात् वचनानि एव न निर्गतानि। सीतायाः सम्भाषणं श्रुत्वा 'कः आगतः स्यात्' इति द्रष्टुम् इच्छन् सत्यनारायणः अधः आगतवान्। पुरतः पितरं दृष्ट्वा आश्चर्यम् अनुभवन् सः स्वकीयानि अङ्गानि परिशीलितवान्।

सत्यनारायणं दृष्टवतः सूर्यस्य कोपः प्रज्वलितः अभवत्। 'एतस्य बालकस्य कारणतः एव मया एतावन्ति कष्टानि अनूभूतानि। शालां बलात् प्रेषयन् एषः मां ताडनपात्रं कृतवान्। मम शरीरम् एव स्वायत्तीकृतवान् आसीत्। मां धिक्कुर्वन् मम शय्यायां स्वपिति स्म। कपाटिकायां स्थितं धनम् अपि स्वायत्तीकृतवान्।'

"अये उद्धत! समाप्तः खलु भवतः अवतारः" इति क्रोधेन गर्जन् तीक्ष्णया दृष्ट्या पुत्रं दृष्टवान् सूर्यः।

पितरं दृष्टवतः सत्यनारायणस्य अपि कोपः प्रवृद्धः। 'वृद्धं शरीरं मह्यं दत्तवान् आसीत् एषः। तदा तु क्रीडितुं न शक्यते स्म। धावितुं न शक्यते स्म। खादनम् अपि अशक्यम् आसीत्। जीर्णं शरीरम् अस्ति चेत् बालः इव व्यवहारः सर्वथा दुःशकः। सर्वस्य कारणीभूतः एषः इदानीं मयि कोपं प्रदर्शयति!'

"अवतारः मम न, अपि तु भवतः समाप्तः" इति महता कोपेन प्रत्युत्तरं दत्तवान् सत्यनारायणः।

"देवि! दृष्टवती खलु सर्वम् अपि। स्वदोषः स्वयं विवेकेन दूरीकरणीयः। अन्यः अत्र किमपि कर्तुं न अर्हति। मया दत्तं वरद्वयम् अपि अविगणय्य तौ यथापूर्वं व्यवहरन्तौ स्तः। ललाटे यथा लिखितं तथैव भवति। तस्य परिवर्तनम् असाध्यम् एव इति अंशः ज्ञातः खलु भवत्या?" इति मन्दहासपूर्वकम् उक्तवान् श्रीमन्नारायणः।

(समाप्ता)

